दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिकशुक्लैकादशी
मार्गशीर्ष 05 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-13 ■ वर्ष-6 ■ अङ्क-24 | 1 | नवम्बर 20, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 टोक्यो-नगरे मन्त्रिस्तरीय-संवादानन्तरं भारत-जापान्-देशौ समुद्री सुरक्षा-सहयोगं अथ संयुक्त-रक्षा-विनिर्माणं वर्धयितुं सहमतिं ज्ञापितवन्तौ

4 हिमाचलसर्वकारस्य दृढसङ्कल्पेन राज्यस्य राजस्व-आये 4,000 कोटिरूप्यकाणां वृद्धिः सुनिश्चिता : मुख्यमन्त्री सुक्खू

12 सार्वजनिकसंवादः : पारिवारिकगोपनीयता, आध्यात्मिक-प्रतीकानां मर्यादा, राहुलगान्धिः च- डॉ. मयङ्कचतुर्वेदी

उद्योग-जगतः दीर्घकालिक-निवेश-निर्णयानाम् आधारं भारतं प्रथमम् भवेत् - प्रधानमन्त्री नरेन्द्रमोदी



प्रधानमन्त्रिणा नरेन्द्रमोदिना उद्योग-जगत् आहूतं यत् आगामी-विंशति-वर्षेषु तैः क्रियमाणस्य प्रत्येकस्य दीर्घकालिक-निवेश-निर्णयस्य आधारं भारतं प्रथमम् इति निर्धारयेयुः। श्रीमोदी अद्य नव-दिल्ल्याम् उद्योग-सङ्घटनस्य फिक्की इत्यस्य शताब्दी सम्मेलनं सम्बोधयन् इदं वक्तव्यं दत्तवान्। प्रधानमन्त्री अवोचत् यत् अनेन आत्मनिर्भर-राष्ट्रस्य निर्माणं भविष्यति अथ च तेषां व्यावसायिक-वृद्ध्यर्थं नूतनाः अवसराः अपि उद्घाटयिष्यन्ते। श्रीमोदी अकथयत् यत् स्वकीये शतवर्षीय-यात्राक्रमे फिक्की-सङ्घटनेन देशस्य उद्योग-जगतः महत्यः उपलब्धयः साक्षीकृताः। प्रधानमन्त्री अवोचत् यत् अयं निर्धारणकालः यत् आगामी-विंशति-वर्षेषु भारतीय उद्योगः किं प्राप्तुं शक्नोति इति। सः प्रतिपादितवान् यत् विगतेषु शत-वर्षेषु भारतस्य अर्थव्यवस्थया अनेके चरणाः दृष्टाः। प्रधानमन्त्री प्रतिपादितवान् यत् भारतं विश्वस्य द्रुतगत्या वर्धमाना प्रमुख-अर्थव्यवस्था वर्तते, यस्याः प्रायः सप्त-प्रतिशतं विकासमानाङ्कः अनुमानितः अस्ति।

सर्वकारेण विविधानां वाहन-श्रेणीनां कृते प्रदूषण-नियन्त्रित प्रमाणपत्रस्य वैधतावधिः संशोधितः



सर्वकारेण विविधानां वाहन-श्रेणीनां कृते 'प्रदूषण नियन्त्रण-प्रमाणपत्रस्य' वैधता-अवधिः संशोधितः। पथ-परिवहन-राजमार्ग-मन्त्रालयेन केन्द्रीय-यान्त्रिक-वाहन-नियमावल्यां कृतेन संशोधनेन बी.एस.-प्रथम-द्वितीय-तृतीय-उत्सर्जन-मानक-युक्तानां वाहनानां प्रमाणपत्रं मासत्रयम्, बी.एस.-चतुर्थ-मानक-युक्तानां च षण्मासान् यावत् वैधं भविष्यति। बी.एस.-षष्ठ-उत्सर्जन-मानकानाम् अनुपालन-कारिणाम् अपरिवहन-वाहनानां विषये षड्-वर्ष-पर्यन्तं, पुरातनानां वाहनानां कृते वर्षत्रयम्, षड्-वर्षेभ्यः अधिक-पुरातनानां दश-वर्ष-पर्यन्तं च वाहनानां कृते एकवर्षम्, तथा दश-वर्षेभ्यः अधिक पुरातनानां कृते षण्मासाः वैधता-अवधिः निर्धारितः अस्ति।

केन्द्रीय-गृहमन्त्री अमितशाहः नवदेहल्यां षष्ठस्य आतङ्कवाद-विरोधि-सम्मेलनस्य उद्घाटनं कृतवान्

केन्द्रीय-गृहमन्त्री अमितशाहः नवदेहल्यां षष्ठस्य आतङ्कवाद-विरोधि-सम्मेलनस्य उद्घाटनं कृतवान्। परिवर्तनशीलानाम् आतङ्कवादी-सङ्कटानां प्रति देशस्य सामूहिक-प्रतिक्रियां सुदृढीकर्तुं गृह-मन्त्रालयस्य अधीनं राष्ट्रिय-अन्वेषण-अभिकरणेन अस्य द्विदिवसीय सम्मेलनस्य आयोजनं कृतम् अस्ति। अस्मिन् सम्मेलने वैदेशिक-न्यायक्षेत्रेभ्यः साक्ष्य-प्राप्तिः आतङ्कवाद-विरोधि-अन्वेषणेषु डिजिटल-न्यायवैज्ञानिक-विज्ञानस्य दत्तांश-विश्लेषणस्य च अनुप्रयोगः, अथ च न्यायिक-विचारणानां प्रभावी प्रबन्धनम् इत्यादिषु विषयेषु चर्चा भविष्यति। सम्मेलनस्य विविध-सत्रेषु चरमपन्थस्य प्रतिरोधः, गुप्तचर-प्रक्रियाः, अथ च राष्ट्रिय सुरक्षां प्रति उदीयमानानि संकर-सङ्कटानि अपि समाविष्टानि भविष्यन्ति।



सुभाषितम्

यः कुलाऽभिजनाऽऽचारैरतिशुद्धः प्रतापवान्।
धार्मिको नीतिकुशलः स स्वामी युज्यते भुवि।।

भावार्थः- पृथ्वी यह अपेक्षा करती है कि उसका शासक एक अच्छे कुल का, अत्यन्त सदाचारी, प्रतापवान, धार्मिक तथा राजनीति में कुशल हो।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
कार्यालयः सम्पर्कः- शिवानी शर्मा 7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा, प्रचारगणः- जगदीश डाभी गुजरातम्, वृजेश कुमार पाण्डेयः, उ.प्र, सत्येन्द्रपाठकः उ.प्र, डा.विमलेश झा बिहारम्, डा.राधवनाथ झा बिहारम्, डॉ.पद्मनाभः हिमाचलम्, डा.निशिकान्त पाण्डेयः प.बंगाल, नवीन ममगाईं उत्तराखण्ड, कुलदीप मैन्दोला उत्तराखण्ड, डा.नवीनशर्मा हरियाणा, अजय कुमार आर्य पंजाब, ईशान तिवारी दिल्ली, रवि खरडिहालः कर्नाटक, डॉ.वर्षा टोणगांवकरः, सुधा साबले महाराष्ट्रम्, ईंदर धीरजः आन्ध्रप्रदेशः, नारद उपाध्यायाः, डा.नयन ज्योति शर्मा असम

आगामी-केन्द्रीय-आयव्ययकस्य सन्दर्भ सूचना-प्रौद्योगिकी-क्षेत्रस्य विशेषज्ञैः हितधारकैश्व सह षष्ठस्य पूर्व-आयव्ययक-परामर्श-उपवेशनस्य अध्यक्षताम् अकरोत् - वित्तमन्त्री



केन्द्रीय-वित्तमन्त्री निर्मला सीतारमणः नवदेहल्याम् आगामी-केन्द्रीय-आयव्ययकस्य सन्दर्भ सूचना-प्रौद्योगिकी-क्षेत्रस्य विशेषज्ञैः हितधारकैश्व सह षष्ठस्य पूर्व-आयव्ययक-परामर्श-उपवेशनस्य अध्यक्षताम् अकरोत्। अस्मिन् उपवेशने आर्थिक-कार्य-विभागस्य सचिवा अनुराधा ठाकुरः, नीति-आयोगस्य मुख्य कार्यकारी अधिकारी अनुराग जैनः, मुख्य-आर्थिक-परामर्शदाता डॉ. वी. अनन्त नागेश्वरन् च उपस्थिताः आसन्। इलेक्ट्रॉनिक सूचना-प्रौद्योगिकी-मन्त्रालयस्य वरिष्ठ-अधिकारिणः अपि अस्मिन् उपवेशने भागम् अगृह्णन्।

टोक्यो-नगरे मन्त्रिस्तरीय-संवादानन्तरं भारत-जापान्-देशौ समुद्री सुरक्षा-सहयोगं अथ संयुक्त-रक्षा-विनिर्माणं वर्धयितुं सहमतिं ज्ञापितवन्तौ



टोकियो-नगरे स्वकीयस्य मन्त्रिस्तरीय-संवादस्य अनन्तरं सामुद्रिक-सुरक्षा-सहयोगं दृढीकर्तुं अथ संयुक्त-रक्षा-निर्माणस्य विस्तारं कर्तुं भारतं जापान-देशश्च 'एकीकृत जटिल-आकाशवाणी-शृङ्गक' अथवा 'यूनिकॉर्न' नाम्नः गुप्त-नौसैनिक स्तम्भ-परियोजनायाः सम्बद्धानां रक्षा-सन्धीनां त्वरित-निष्पादनाय सम्मतौ जातौ। विदेशमन्त्रिणा एस. जयशङ्करेण, जापान-देशस्य विदेशमन्त्रिणा तोशिमित्सु-मोटेगि-महोदयेन, रक्षामन्त्रिणा शिन्जिरो-कोइजुमि-महोदयेन च सह संयुक्त-वार्ताहर-सम्मेलनं सम्बोधयन् रक्षामन्त्री राजनाथ सिंहः प्रावोचत् यत् एतासु चर्चासु उभयोः देशयोः 'विशेष रणनीतिक-वैश्विक सहभागितायाः' अन्तर्गतं द्विपक्षीय-प्रादेशिक-विषयाणां विस्तीर्णः परिधिः समाविष्टः आसीत्। श्रीसिंहेन प्रोक्तं यत् भारत-जापान-देशयोः कूटनीतिक वार्ताः पञ्चविंशत्युत्तर-द्विसहस्रतमस्य वर्षस्य अगस्त-मासे हस्ताक्षरितस्य 'सुरक्षा-सहयोग-संयुक्त-घोषणापत्रस्य' आधारेण प्रवृत्ताः। विदेशमन्त्री एस. जयशङ्करः अवदत् यत् भारत-जापान-सहयोगः बहुध्रुवीय-एशिया महाद्वीपस्य तथा बहुध्रुवीय-विश्वस्य पोषणं कर्तुम् ईहते, वर्धमानानां भू-राजनीतिक-आर्थिक-अनिश्चितानां मध्ये द्विपक्षीय-सम्बन्धानां सुदृढीकरणस्य महत्त्वं च तेन प्रतिपादितम्। सामुद्रिक-सुरक्षा-विषये उभौ देशौ सामुद्रिक-आकाश-क्षेत्र-प्रबोधे, अन्वेषण-परित्राण-कार्ये, सूचना आदानप्रदाने च सहयोगाय अधुना एव हस्ताक्षरितस्य 'व्यवस्था-ज्ञापनस्य, क्रियान्वयनाय सम्मतौ अभवताम्। रक्षामन्त्री राजनाथ सिंहः टोकियो-नगरे स्वकीयेन जापानी-समकक्षेण शिन्जिरो कोइजुमि-महोदयेन सह प्रतिनिधिमण्डल-स्तरीयं सम्भाषणम् अकरोत्। स्वकीये वक्तव्ये श्रीसिंहः प्रावोचत् यत् रक्षा-सम्बन्धेषु सम्भाषणेन असौ संतुष्टो वर्तते।

अक्वान-भीषण-चक्रवातः आन्ध्रप्रदेशस्य नरसापुर-पुरी-तटयोः मध्ये स्थल-प्रवेशं करिष्यतीति सम्भावनया ओडिशा-राज्ये द्विसप्तति-सहस्राधिकाः जनाः सुरक्षित-स्थानेषु नीताः

पश्चिम-मध्य-बङ्गालोपसागरे स्थिता अक्वान-भीषण-चक्रवातः उत्तर-उत्तर-पश्चिम-दिशि अग्रेसरन् गोपालपुरस्य नरसापुर-पुरी-क्षेत्रयोः मध्ये उत्तर-आन्ध्रप्रदेश-यानम-अथ-दक्षिण-ओडिशा-तटम् उल्लङ्घयिष्यति। अस्य चक्रवातस्य नवतितः शत-किलोमीटर्-प्रतिघण्टात्मक-वेगेन अथ च दशोत्तर-शत-किलोमीटर्-प्रतिघण्टा पर्यन्तं प्रबल-झञ्झावातेन सह तटम् उल्लङ्घयितुं सम्भावना वर्तते। भारत-ऋतु-विज्ञान-विभागेन गञ्जाम, गजपति, कन्धमाल, पुरी, जगत्सिंहपुर, केन्द्रापाडा चेत्येतेषु जनपदेषु अतिवृष्ट्यै रक्तवर्णपरा सञ्चेतना प्रकाशिता। इतश्च ओडिशा-सर्वकारेण चक्रवातस्य प्रतिकाराय स्वकीया सज्जता तीव्रीकृता। राज्य-मुख्य-सचिवः अनु-गर्गः भुवनेश्वरे राज्य-स्तरीय-नियन्त्रण-कक्षे वार्ताहरान् सम्बोधयन्ती सूचितवती यत् प्रायः द्विसप्तति-सहस्रं जनाः सुरक्षित-स्थानेषु स्थानान्तरिताः। संवेदनशील-मण्डलेषु ओ.डी.आर.ए.एफ. इत्यस्य षष्टिदलानि, राष्ट्रिय-आपत्मोचन-बलस्य चतुर्दशदलानि, अथ च अग्निशमन-सेवायाः एकत्रिंशदधिक-शतं दलानि नियुक्तानि सन्ति।

भारतस्य युवाशक्तिः एव तस्य प्रमुखं सामर्थ्यम्; 26 प्रतिशतं जनसङ्ख्या 10-24 वयोवर्गे वर्तते

नवदेहली, पीटीआई। भारतस्य सर्वप्रमुखा शक्तिः तस्य युवा-जनसङ्ख्या एव अस्ति। देशस्य प्रतिचतुर्षु नागरिकेषु एकाधिकाः नागरिकाः 10 तः 24 वर्षयोः वयोवर्गे सन्ति। संयुक्तराष्ट्र-जनसङ्ख्याकोषस्य (यूएनएफपीए) 'विश्वजनसङ्ख्यायाः स्थितिः' इति प्रतिवेदनानुसारं भारतस्य कुलजनसङ्ख्या 147.66 कोटिः अस्ति, तथा च आगामिषु 81 वर्षेषु अस्याः द्विगुणितत्वस्य अनुमानं वर्तते। अनेन सह भारतं विश्वस्य सर्वाधिकजनसङ्ख्यायुक्तः देशः अस्ति, यत्र चीनदेशः 141.29 कोटिजनेन द्वितीयस्थाने वर्तते। प्रतिवेदनानुसारं भारतस्य 26 प्रतिशतं जनसङ्ख्या 10-24 वयोवर्गे, 17 प्रतिशतं 10-19 वयोवर्गे, तथा च 24 प्रतिशतं 0-14 वयोवर्गे निवसति। अपरत्र 69 प्रतिशतं जनाः 15-64 वयोवर्गे, अष्ट (8) प्रतिशतं च 65 वर्षीयाः तदधिकाः वा सन्ति। इयं विशाला युवाजनसङ्ख्या देशस्य विकासाय महत्त्वपूर्णः अवसरः अस्ति।

मातृत्व-पितृत्वप्राप्तिः अद्यापि महती आकाङ्क्षा

'जनसाङ्ख्यिकीय-भविष्य-सर्वेक्षण 2026' इत्यनुसारं 18-39 वयोवर्गस्य महिलाभिः आदर्शपरिवाररूपेण औसततः 2.1 अपत्यानाम् इच्छा प्रकटिता। 35-39 वयोवर्गस्य महिलानाम् औसततः एकम् अपत्यम् आसीत्, तथा च अस्मिन् वयोवर्गे निःसन्तानानाम् उत्तरदातृणां प्रायः 85 प्रतिशतं जनैः माता-पिता भवितुम् इच्छा व्यक्ता। देशे कुलप्रजननदरः प्रतिमहिला द्वौ (2) जन्म वर्तते, यः 2.1 इति प्रतिस्थापनस्तरस्य समीपे अस्ति। तथापि राज्येषु अस्मिन् भिन्नता दृश्यते—यत्र सिक्किमराज्ये अयं दरः एकः (1), तत्र बिहारराज्ये 2.7 वर्तते।

अभ्यास-क्रिकेट्-क्रीडायां भारतं विरुध्य प्रथम-दिवसस्य समाप्तिं यावत् न्यूजीलैण्ड्-दलेन पञ्च-क्रीडकानां हानौ त्रिचत्वारिंशद् अधिक-द्विशतं धावनाङ्कः समर्जिताः



वेलिङ्ग्टन्-नगरे प्रथम-टेस्ट-स्पर्धायाः प्रथम-दिवसस्य अन्ते न्यूजीलैण्ड-दलम् पंचक्रीडकानां-हानौ त्रिचत्वारिंशदुत्तरद्विशतं धावनाङ्कान् विजितवत्। निकॉल्स-फिलिप्स-इत्येतयोः मध्ये त्रिसप्त-त्युत्तरैकशतधावनाङ्कानाम् अपराजित-सहभागिता अभवत्। निकॉल्स इत्येषः त्रयोदशधिकैकशत धावनाकैः अपराजितः अस्ति, फिलिप्स च चतुर्नवतिधावनाङ्कैः सह क्रीडिष्यति।

हाङ्ग्काङ्ग्-ओपन-बैडमिण्टन-प्रतियोगितायाः एकलवर्गस्य प्री-क्वार्टरफाइनल्-चक्रे प्रविष्टाः लक्ष्यसेन-किदाम्बीश्रीकान्त-रक्षितारामराज-अस्मिताचालिहाः



नवदेहली। प्रचलिते हाङ्गकाङ्ग-ओपन-बैडमिण्टन-क्रीडोत्सवे भारतस्य प्रमुखक्रीडकाः लक्ष्यसेनः, किदाम्बी श्रीकान्तः, रक्षिता रामराजः, तथा च अस्मिता चालिहा च स्वकीय-एकलवर्गस्य (सिङ्गल्स्) प्री-क्वार्टरफाइनल्-चक्रं प्राप्तवन्तः। प्रथमचक्रे पुरुष-एकलवर्गे लक्ष्यसेनेन फ्रांसदेशीयः क्रीडकः अरनॉड मर्कले पराजितः, यत्र किदाम्बी श्रीकान्तेन जापानदेशस्य कोकी वतानबे-महोदयस्य उपरि विजयः प्राप्तः। अपरत्र महिला-एकलवर्गे अस्मिता चालिहा स्वदेशीयं प्रतिद्वन्द्विनीम् ईशारानी बरुआं पराजितवती, तथा च रक्षिता रामराजेन डेनमार्कदेशस्य मिया ब्लिचफेल्ड्ट पराजिता।

स्वास्थ्यसेवासु परिष्कारः, चुनौत्यः च अवशिष्टाः

भारते 2022-24 कालखण्डे मातृमृत्यु-अनुपातः प्रतिलक्षं जीवितजन्मसु 87 आसीत्। कुशलस्वास्थ्यकर्मिणां देखरेखे प्रसवस्य अनुपातोऽपि 'राष्ट्रीय-परिवार-स्वास्थ्य-सर्वेक्षण' (एनएफएचएस-5) इत्यस्य 89.4 प्रतिशततः वर्धित्वा एनएफएचएस-6 मध्ये 91.3 प्रतिशतं जातः। तथापि आधुनिकगर्भनिरोधकोपायानाम् उपयोगः 56.4 प्रतिशततः न्यूनीभूय 52.7 प्रतिशतम् अवशिष्टः, यत्र पारम्परिकौपायानाम् उपयोगः 10.3 प्रतिशततः वर्धित्वा 16.4 प्रतिशतं जातः।

भव्यया शोभायात्रया अन्ताराष्ट्रिय- रेणुका- मेलापकः आरब्धः, सहस्रशः जनाः अभवन् मातृ-पुत्रयोः मिलनस्य साक्षिणः



हिमसंस्कृतवार्ताः- नाहनम्।

हिमाचलप्रदेशस्य समृद्धलोकसंस्कृतेः प्रतीकः अन्ताराष्ट्रिय- रेणुका- मेलापकः गुरुवासरे आरब्धः अभवत्। उपमुख्यमन्त्री मुकेश अग्निहोत्री भव्यया शोभायात्रया सह मेलापकस्य विधिवत् शुभारम्भम् अकरोत्। सः देवशिविकान स्कन्धे धृत्वा प्रस्थापितवान्, शोभायात्रायाः नेतृत्वं चापि अकरोत्। शोभायात्रा अपराह्णे ददाहू-स्थिते क्रीडाङ्गणे आरब्धा। इयं ददाहू-विपणी, गिरिपुलं, बेडोन-स्थलं, देवशिलां मेलापक-प्राङ्गणं च अतिक्रम्य अगच्छत्।

सायङ्कालात् पूर्वं शोभायात्रा रेणुकाजी-तीर्थस्य त्रिवेणीघट्टं प्राप्तवती। तत्र मातुः रेणुकायाः पुत्रस्य परशुरामस्य च पारम्परिकम् आध्यात्मिकं च मिलनं कारितम्। अस्य ऐतिहासिकमिलनस्य सहस्रशः श्रद्धालवः साक्षिणः अभवन्। पारम्परिक-लोकवाद्ययन्त्राणां, शङ्खानां, घण्टानाम्, आनक-दुन्दुभीनां, वाद्यवृन्दानां च मधुरध्वनिना रेणुका-उपत्यका गुञ्जायमाना अभवत्। भगवतः परशुरामस्य प्राचीनेभ्यः जामू-कटाहा- महासू-मण्डलाह- मन्दिरेभ्यः आगताः रजतजटिताः देवशिविकाः आकर्षणस्य केन्द्रम् अतिष्ठन्। श्रद्धालवः देवतानां दर्शनं कृत्वा मनोकामनापूर्त्यर्थं प्रार्थनाः अकुर्वन्।

राजपरिवारेण निर्वहता शताब्दीप्राचीना परम्परा

रेणुका-मेलापकस्य शताब्दीप्राचीनां परम्परां निर्वोढुं राजपरिवारस्य वंशजाः अपि गुरुवासरे ददाहूस्थलं प्राप्तवन्तः। राजपरिवारस्य वंशजः कँवर-अजयबहादुरसिंहः परम्परागतवेशभूषायां शिविकायाः स्वागतम् अकरोत्। सः परिवारस्य सदस्यैः सह भगवतः परशुरामस्य रजतजटितां शिविकां मण्डपं यावत् प्रापितवान्। इदं कार्यं विधिवत् मन्त्रोच्चारणस्य मध्ये सम्पन्नम् अभवत्, यस्मिन् कँवर अभयबहादुरः, कँवर हेमन्तसिंहः अन्ये च सदस्याः उपस्थिताः आसन्।

सेनायाः उपरि टिप्पण्या क्रुद्धः प्रतिपक्षः, उद्घोषणं कृत्वा सदनात् कृतं बहिर्गमनम्, उक्तम्- क्षमां याचेत् जगतसिंहनेगी



हिमसंस्कृतवार्ताः- धर्मशाला।

हिमाचलप्रदेश- विधानसभायाम् 'ऑपरेशन-सिन्दूर', 'राफेल- व्यवहारे', भारतीयसेनायां च मन्त्रिणः जगतसिंहनेगी-महोदयस्य टिप्पणीम् अधिकृत्य गुरुवासरे तीव्रः कोलाहलः अभवत्। मन्त्रिणः वक्तव्येन रुष्टाः प्रतिपक्षस्य भाजपा-विधायकाः सदने उद्घोषणम् अकुर्वन् तथा च विरोधं प्रकटयन्तः सदनात् बहिर्गमनं कृत्वा बहिः आगतवन्तः। प्रतिपक्षनेता जयरामठाकुरः मन्त्रिणः उपरि भारतीयसेनायाः अपमानं कर्तुम् आरोपम् आरोपयन् तस्मात् सदने क्षमायाचनायाः याचनाम् अकरोत्।जयरामठाकुरः अवदत् यत् मन्त्री जगतसिंहनेगी गतेभ्यः चतुःपञ्चदिनेभ्यः निरन्तरं विवादास्पद- वक्तव्यानि ददाति। तेन आरोपः आरोपितः यत् मन्त्री अधुना सर्वकारस्य नियन्त्रणात् बहिः गतः अस्ति। संवैधानिकदायित्वं निर्वहन्तः मन्त्रिणः पक्षतः देशस्य सेनायाः विरुद्धं पुनः पुनः टिप्पणीं कर्तुं दुर्भाग्यपूर्णम् अस्ति। सः प्रावोचत् यद् 'ऑपरेशन- सिन्दूर' इत्यस्य अन्तराले राफेल-विमानानां भूमिकां व्यवहारं च अधिकृत्य मन्त्रिणा भ्रष्टाचारस्य आरोपाः आरोपिताः। प्रतिपक्षस्य पक्षतः भारतीयसेनायाः कार्यविधेः उल्लेखं कृते सति मन्त्रिणा तादृशी टिप्पणी कृता, यां भाजपादलं सेनायाः अपमानं निर्दिष्टवान् अस्ति। जयरामठाकुरः अवदत् यत् भारतीयसेनायाः बलेन देशः सुरक्षितः वर्तते। सेनया पाकिस्तानाय समुचितं प्रत्युत्तरं दत्तम् अस्ति, समग्रविश्वे तस्याः सम्मानः वर्धितः अस्ति। एतादृश्यां स्थितौ विधानसभासदृशे गरिमामये सदने सेनायाः भूमिकायाम् अनेन प्रकारेण टिप्पणी स्वीकर्तुं न शक्यते। सः अवदत् यत् विधानसभाध्यक्षात् मन्त्रिणः विवादास्पदटिप्पणीं सदनस्य कार्यविधेः निष्कासयितुं याचना कृता अस्ति। मुख्यमन्त्रिणः अपि प्रश्नः कृतः यत् सेनायाः विरुद्धं पुनः पुनः वक्तव्यदानस्य अनन्तरमपि मन्त्री मन्त्रिमण्डले किमर्थं स्थापितः अस्ति? भाजपा-दलस्य याचना अस्ति यत् जगतसिंहनेगी सदने क्षमां याचेत् तथा तस्य विवादास्पदटिप्पणी कार्यविधेः निष्कास्यताम्। क्षमायाचनाम् अकृते सति प्रतिपक्षः इमं विषयं पुनः सदने उत्थापयिष्यति।

'चतुष्पथ-मार्गेण प्रभावितेभ्यः भवनस्वामिभ्यः क्षतिपूर्तिं यच्छेत् एनएचएआई निर्माणसंस्था च', हिमाचल-उच्चन्यायालयेन निर्गमितः निर्देशः



हिमसंस्कृतवार्ताः- शिमला।

हिमाचलप्रदेश-उच्चन्यायालयेन राष्ट्रियराजमार्ग-५ (NH-5) इत्यस्य चतुष्पथ-मार्गस्य (फोरलेन्) निर्माणकार्यकारणात् शिमलायाः भट्टाकुफर-स्थिते माठू-उपनिवेशे (कॉलोनी-मध्ये) भवनानां जातां क्षतिम् एकस्य च भवनस्य पतनम् अधिकृत्य महत्त्वपूर्णाः आदेशाः पारिताः सन्ति। मुख्यन्यायाधीशस्य जी. एस. सन्धावालिया महोदयस्य न्यायाधीशस्य बिपिन सी. नेगी महोदयस्य च खण्डपीठेन एकस्याः श्रवणप्रक्रियायाः अन्तराले राज्यसर्वकारेण प्रभावितगृहाणां क्षतिम् अधिकृत्य कृतम् आकलनम् अभिलेखे स्वीकृतम्।

'एनएचएआई' (NHAI) संस्थया दत्तः स्वकीयांशः

श्रवणकाले न्यायालयाय सूचितं यत् पूर्व-आदेशस्य अन्तर्गततया 'भारतीय- राष्ट्रिय- राजमार्ग-प्राधिकरणेन' स्वकीयांशस्य पञ्चाशत्प्रतिशतं (५०%) धनराशिः अर्थात् १,११,७७,९६२ रूप्यकाणि निक्षिप्तानि कारितानि सन्ति। यद्यपि निर्माणसंस्थया (मेसर्स गावर शिमला हाइवे प्राइवेट लिमिटेड) उच्चन्यायालयस्य आदेशाय सर्वोच्चन्यायालये आह्वानं दत्तम् अस्ति।

एशियाई-महिला-हॉकी-चैम्पियन्स्-ट्रॉफी-प्रतियोगितायां भारतस्योत्तमः आरम्भः; प्रथमे क्रीडने मलेशियादलं ४-१ (चतुः-एक) अङ्कैः पराजितम्



नवदेहली, २० नवम्बर २०२६। भारतीय-महिला-हॉकी-दलेन एशियाई-महिला-हॉकी-चैम्पियन्स्-ट्रॉफी-प्रतियोगितायाः आरम्भः अतीव उत्साहवर्धकविजयेन सह कृतः अस्ति। आयोजिते स्वकीये प्रथमे महत्त्वपूर्णक्रीडने भारतीयमहिलाभिः उत्कृष्टं क्रीडाकौशलं, समन्वयं, आक्रामकतां च प्रदर्शयन्त्यः मलेशियादेशस्य दलं ४-१ (चतुः-एक) गोलान्तरालेन पराजितम्। क्रीडनस्य आरम्भादेव भारतीयक्रीडिकाभिः प्रतिद्वन्द्विदलस्य उपरि दबावः स्थापितः। भारतस्य पक्षतः मुमताज खान, सलीमा टेटे, पूजा साहू तथा च लालरेमसियामी इत्येताभिः चतसृभिः क्रीडिकाभिः एकैकं गोलं कृत्वा दलस्य विजयः सुनिश्चितः कृतः। भारतीय-रक्षापङ्क्तिः अपि अतीव सुदृढा आसीत्, यस्याः कारणेन मलेशियादलं केवलम् एकम् एव गोलं कर्तुं समर्थम् अभवत्।

सर्वोच्चन्यायालयेन संविदाकारात् उद्ग्रहण- प्रक्रियायां स्थापितं स्थगनम्



सर्वोच्चन्यायालयेन ५ अक्तूबर २०२६ दिनाङ्के आदेशं पारितं कृत्वा संविदाकारात् क्षतिपूर्तेः उद्ग्रहण- प्रक्रियायाम् अन्तरिमस्थगनं स्थापितम् अस्ति। यतो हि प्रकरणं साम्प्रतं शीर्षन्यायालये विचाराधीनम् अस्ति, अतः उच्चन्यायालयेन अस्मिन् चरणे किमपि अन्यत् निर्देशं निर्गन्तुं हस्तौ निगृहीतौ स्तः तथा च प्रकरणस्य अग्रिमं श्रवणं २८ दिसम्बर् २०२६ दिनाङ्के निर्धारितं कृतम् अस्ति।

'एनएचएआई' (NHAI) संस्थातः याचितम् उत्तरम्

न्यायालयेन आवेदिकायाः चन्दादेव्याः प्रार्थनापत्रं स्वीकुर्वता सा अस्यां जनहितयाचिकायां प्रतिवादिरूपेण पक्षकारः निर्मित अस्ति। तस्याः परिवादस्य आधारेणैव अस्य प्रकरणस्य कार्यविधिः प्रारब्धा आसीत्। सञ्जौली-क्षेत्रस्य चलौंठी-ग्रामस्य देवकीदेव्या अपि चतुष्पथ-मार्गकार्यकारणात् गृहं रिक्तं कर्तुं विवशताम् अधिकृत्य प्रतिवेदनं दत्तम् अस्ति, यस्मिन् विषये 'एनएचएआई' (NHAI) संस्थातः उत्तरं याचितम् अस्ति।

मूल्याङ्कनं निश्चितम्

राज्यसर्वकारेण न्यायालये उपस्थापितस्य मूल्याङ्कन- प्रतिवेदनस्य (रिपोर्ट-अनुसारम्) अनुसारेण, प्रभावितायै रञ्जनायै २,२२,५७,४३६, अरुणठाकुराय अङ्कुशठाकुराय च १,६९,२४,०४५, बृजलालाय १,५७,७६,५१३, अशोकाय १,४६,५७,६५५, चन्दादेव्यै १,३६,३३,७३०, प्रदीपाय १,३०,७३,५९१, योगेशाय अन्येभ्यश्च ३२,५९,५६२ रूप्यकाणां मूल्याङ्कनं निश्चितं कृतम् अस्ति।

पञ्चाशत्-पञ्चाशत् प्रतिशतं (५०-५०%) करणीया भविष्यति भुक्तिः

न्यायालयेन स्पष्टीकृतं यत् पूर्वनिर्धारितव्यवस्थायाः अन्तर्गततया अस्याः आकलितराशेः भुक्तिः 'एनएचएआई' संस्थया संविदाकारेण च पञ्चाशत्-पञ्चाशत् प्रतिशतस्य (५०-५०%) समानांशे करणीयं भविष्यति, किन्तु अन्तिमनिर्णयः सर्वोच्चन्यायालयस्य आदेशानाम् अधीनः स्थास्यति।



हिमाचलसर्वकारस्य दृढसङ्कल्पेन राज्यस्य राजस्व-आये 4,000 कोटिरूप्यकाणां वृद्धिः

सुनिश्चिता : मुख्यमन्त्री सुक्खू

गलोड़ (हमीरपुरम्)। हिमाचलसर्वकारस्य दृढ-राजनैतिकेच्छाशक्तेः प्रतिबद्धतायाः च बलेन प्रदेशस्य राजस्व-आये 4,000 कोटिरूप्यकाणां वृद्धिः सुनिश्चिता अभवत्। हिमाचलप्रदेशेन किशाऊ-बहुउद्देश्यीय-बन्धपरियोजनायाः सन्धौ स्वकीयनियमानाम् अनुरूपं समझौता कृतः अस्ति, येन अधुना अस्यां परियोजनायां प्रदेशसर्वकारेण एकमपि रूप्यकं निवेशनीयं न भविष्यति। परियोजनायाः पूर्णतानन्तरं हिमाचलप्रदेशः प्रतिवर्षं 1,200 तः 1,500 कोटिरूप्यकाणां राजस्वं प्राप्स्यति, यत्र अस्य निर्माणे उत्तराखण्डराज्येण प्रायः 3,000 कोटिरूप्यकाणि व्ययनीयानि भविष्यन्ति। एतत् कथनं मुख्यमन्त्रिणा ठाकुर-सुखविन्दरसिंह-सुक्खू-महोदयेन गुरुवासरे गलोड़क्षेत्रे आयोजिते जनसभायाम् उक्तम्। मुख्यमन्त्री अत्र चिकित्साशिविरस्य शुभारम्भं कर्तुम् आगतः आसीत्। तेन उक्तं यत् वर्तमानराज्यसर्वकारस्य चतुर्वर्षीयकार्यकालस्य पूर्णतायाः उपलक्ष्ये हमीरपुरमण्डलस्य सुजानपुरे एकः भव्यः समारोहः आयोजयिष्यते।

गलोड़-क्षेत्राय महत्त्वपूर्णाः घोषणाः

अस्मिन् अवसरे मुख्यमन्त्रिणा गलोड़मध्ये खण्डविकास-अधिकारि-कार्यालयस्य उद्घाटनस्य, स्थानीयसहकारीसमित्यै एककोटिरूप्यकप्रदानस्य, तथा च ग्रामपञ्चायत-गोईस-इत्यस्य नवीनपञ्चायत-भवनस्य निर्माणार्थं वित्तीयसहायताप्रदानस्य च घोषणाः कृताः। मुख्यमन्त्रिणा उक्तं यत् प्रदेशसर्वकारस्य प्रयासैः राज्यस्य वित्तीयसंसाधनेषु वृद्धिः जाता अस्ति, यस्य परिणामस्वरूपं विद्यालयानाम् अत्याधुनिक-स्वास्थ्यसंस्थानानां च विकासः सम्भवः भविष्यति, येन जनेभ्यः उत्तमाः सुविधाः उपलप्स्यन्ते।

हमीरपुर-चिकित्सामहा-विद्यालयस्य विकासः श्रेयः च

मुख्यमन्त्री अवदत् यत् भाजपा-दलस्य नेतारः डॉ. राधाकृष्णन्-राजकीय-चिकित्सामहाविद्यालयस्य (हमीरपुरम्) श्रेयं ग्रहीतुं प्रयतन्ते, यदा तु अस्य संस्थानस्य स्थापना पूर्वप्रधानमन्त्रिणः डॉ. मनमोहनसिंहस्य पूर्वकेन्द्रीयस्वास्थ्यमन्त्रिणः गुलाम-नबी-आजाद-महोदयस्य च योगदानेन सम्भवा अभवत्। मुख्यमन्त्री अवदत् यत् अस्य चिकित्सामहाविद्यालयस्य स्थापनायै तेन स्वयमपि प्रयासाः कृताः आसन्। हमीरपुर-चिकित्सामहाविद्यालयस्य निर्माणकार्याय गतिं प्रदातुं वर्तमान-कांग्रेससर्वकारेण राज्यस्य स्वकीयसंसाधनेभ्यः 500 कोटिरूप्यकाणि व्ययीकृतानि सन्ति। इयं संस्था आगामिनि एकस्मिन् वर्षे प्रदेशस्य सर्वश्रेष्ठेषु चिकित्सामहाविद्यालयेषु सम्मिलिता भविष्यति।

निम्नस्तरस्य औषधीनां निर्मातॄणां विरुद्धं भविष्यति कठोरा कार्यविधिः, सर्वकारेण निर्गमिताः दिशानिर्देशाः



हिमसंस्कृतवार्ताः- धर्मशाला।

मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः प्रदेशे कृत्रिम- निम्नस्तरीय-औषधीनां निर्माणम् आपूर्तिं च अधिकृत्य कठोरं पक्षं स्वीकुर्वन् अवदत् यत् ईदृशे व्यवसाये संलग्नानां जनानां विरुद्धं कठोरं कार्याचरणं भविष्यति। अस्मिन् सम्बन्धे प्रदेशसर्वकारेण आवश्यकाः दिशानिर्देशाः निर्गमिताः सन्ति। केन्द्रस्तरे अपि सम्बद्धाधिकारिणः कार्यविधये कथिताः सन्ति।

सः प्रावोचत् यत् सर्वकारीयचिकित्सालयेषु रुग्णेभ्यः गुणवत्तापूर्णानि औषधानि उपलब्धं कारयितुं सर्वकारस्य प्राथमिकता वर्तते। मुख्यमंत्रीमहोदयः सूचितवान् यत् औषधीनां क्रयणे गुणवत्तां निश्चेतुं पञ्चशतकोटि-रूप्यकेभ्यः (५०० कोटि) अधिकस्य वार्षिकव्यापारस्य (कारोबारस्य) संस्थानां नियमः स्थापितः आसीत्, किन्तु लघु-औषध- आपूर्तिकर्तृणाम् उच्चन्यायालयं गमनानन्तरं न्यायालयेन अस्मिन् नियमे स्थगनम् आरोपितम् अस्ति। सः अवदत् यत् औषधीनां गुणवत्तायाः साक्षात् सम्बन्धः जनानां स्वास्थ्येन सह अस्ति। सर्वकारः अस्मिन् प्रकरणे किमपि सामञ्जस्यं न करिष्यति।

इन्दिरागान्धी-महोदयायै विधानसभापरिसरे श्रद्धांजलिः

विधानसभायाः शीतकालीने सत्रे धर्मशालायां पूर्वप्रधानमन्त्रिण्याः स्वर्गीयायाः इन्दिरागान्धी-महोदयायाः जयन्त्याम् अवसरे बुधवासरे विधानसभापरिसरे धर्मशालायां श्रद्धांजलिकार्यक्रमः आयोजितः। अस्मिन् अन्तराले मुख्यमन्त्री ठाकुर-सुखविन्दरसिंहसुक्खूः, विधानसभाध्यक्षः सहितम् अन्ये च गणमान्यजनाः इन्दिरागान्धी-महोदयायै श्रद्धासुमनानि अर्पितवन्तः।

मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः अवदत् यत् देशस्य एकतायै अखण्डतायै च इन्दिरागान्धी स्वकीयं सर्वोच्चं बलिदानं दत्तवती। देशस्य निर्माणे तस्याः ऐतिहासिकनिर्णयाः योगदानं च सदैव स्मरिष्यन्ते। १९७१ तमे वर्षे तस्याः नेतृत्वे बाङ्ग्लादेशस्य निर्माणम् अभवत्। एतदतिरिच्य तया राजसंस्थानानां शासकानां विशेषाधिकारान् समापयितुं, भूमिसीमा-विधानं च प्रवर्तयितुं सदृशाः महत्त्वपूर्णाः निर्णयाः स्वीकृताः। दृढ-इच्छाशक्तेः साहसिकनेतृत्वस्य च कारणादेव सा 'लौहमहिला' इति नाम्ना ज्ञायते।

लडभड़ोल-दुर्घटनायां शोकः

मुख्यमन्त्री मण्ड्यां सञ्जातायां दुर्घटनायां दुःखं प्रकटयन् प्रभावितपरिवारान् प्रति संवेदनां प्रकाशितवान्। सः अवदत् यत् सन्तानस्य नाशस्य दुःखं पित्रोः कृते असहनीयं भवति।

संस्कृतं भारतस्य सनातन-ज्ञानचेतनायाः, सांस्कृतिक- अस्मितायाः जीवनदर्शनस्य च अमरसम्पदा- कुलपतिः प्रो. बिहारीलालशर्मा



संस्कृतच्छात्रेभ्यः महान् उपहारः, शास्त्री- आचार्य- उपाधिधारकाः अपि अधुना टीजीटी- पीजीटी- नियुक्तिषु पात्राः।

हिमसंस्कृतवार्ताः- वाराणसी।पारम्परिक-संस्कृतशिक्षापद्धत्या अध्ययनं कुर्वतां छात्राणां वर्षाणां शैक्षिकसाधनायै, प्रतिभायै परिश्रमाय च उचितसम्मानं दापयितुं तथा तान् आधुनिकवृत्तेः अवसरैः सह योजयितुं दिशि उत्तरप्रदेशशासनेन एकः अतीव महत्त्वपूर्णः स्वागतयोग्यश्च निर्णयः स्वीकृतः अस्ति। अस्य अन्तर्गततया सम्पूर्णानन्द-संस्कृत- विश्वविद्यालयस्य वाराणस्याः शास्त्री-आचार्य- उपाधीनां क्रमशः स्नातक-स्नातकोत्तर-उपाधिभ्यां समकक्षतां स्वीकुर्वता संस्कृतविषयस्य टी.जी.टी., पी.जी.टी. च शिक्षकनियुक्तिषु तेषाम् अर्हतां ग्राह्यतां च स्पष्टीकर्तुं शासनस्तरात् आवश्यकं कार्याचरणं विहितम् अस्ति। अनेन निर्णयेन संस्कृतच्छात्राणां भविष्यं प्रति नूतनाशायाः विश्वासस्य च सञ्चारः सञ्जातः अस्ति।

कुलपतिना प्रकटितः शासनस्य हार्दिकः आभारः

अस्मिन् दूरदर्शिणि सकारात्मक-उपक्रमे च विश्वविद्यालयस्य कुलपतिः प्रो. बिहारीलालशर्मा उत्तरप्रदेशशासनं प्रति हार्दिकम् आभारं कृतज्ञतां च प्रकटितवान् अस्ति। सः अवदत् यत् संस्कृतं केवलम् अस्माकं प्राचीनज्ञानपरम्परायाः अमूल्या सम्पदा एव नास्ति, अपि तु भारतस्य सनातन-ज्ञानचेतनायाः, सांस्कृतिक-अस्मितायाः, जीवनमूल्यानां जीवनदर्शनस्य च अमरः आधारः वर्तते। संस्कृतच्छात्रेभ्यः तेषाम् अर्जित-शैक्षिकयोग्यतायाः अनुरूपं सम्मानं, परिचयः अवसराश्च प्राप्तुम् अत्यन्तम् आवश्यकम् अस्ति। कुलपतिः विश्वासं प्रकटितवान् यत् शासनस्य एतादृशैः सकारात्मकनिर्णयैः संस्कृतशिक्षायाः प्रतिष्ठा सुदृढा भविष्यति, देववाण्याः संस्कृतस्य संरक्षणाय, संवर्धनाय व्यापकप्रसाराय च नूतना ऊर्जा लप्स्यते तथा छात्राणाम् उज्ज्वलभविष्यस्य मार्गः प्रशस्तः भविष्यति।

आयोगं प्रति निर्गमितं शासनस्य महत्त्वपूर्णं पत्रम्

देवभाषायाः संस्कृतस्य गौरवशालिन्याः शैक्षिकपरम्परायाः संरक्षणाय अस्मिन् क्रमे माध्यमिकशिक्षायाः सचिवया किञ्जलसिंहया (माध्यमिकशिक्षा- अनुभाग-०५) १३ नवम्बर, २०२६ दिनाङ्के 'उत्तरप्रदेश- शिक्षा- सेवा- चयन-आयोगाय, प्रयागराजाय' एकं महत्त्वपूर्णं पत्रं प्रेषितम् अस्ति। अस्मिन् पत्रे शास्त्री (संस्कृतम्) उपाधिधारिणां कृते विज्ञापनसंख्या ०७/२०२६ इत्यस्य अन्तर्गततया सहायकाध्यापक-पदाय (संस्कृतम्) आवेदनं कर्तुं काऽपि कठिनता न भवेत् इति स्पष्टीकुर्वता वर्तमाननियुक्तिविज्ञापने आवश्यकं संशोधनं कर्तुं विषयः उत्थापितः अस्ति। निःसन्देहम्, अयम् उपक्रमः केवलम् उपाधीनां समकक्षतायाः प्रशासनिकविषयः नास्ति, अपि तु भावि-सन्ततेः उज्ज्वलभविष्यस्य नूतनां दिशां ददत् प्रशंसनीयः प्रयासः अस्ति।

एन.सी.ई.आर.टी.- श्रीजगन्नाथ- संस्कृत- विश्वविद्यालययोः संयुक्ततत्त्वावधाने

पञ्चदिवसीय- क्षमतासंवर्धनकार्यक्रमे डॉ. प्रज्ञाशर्मणः क्रियात्मक-व्यावहारिकं सत्रम्



हिमसंस्कृतवार्ताः-भाषाशिक्षाविभागः, राष्ट्रिय-शैक्षिकानुसन्धान- प्रशिक्षणपरिषद्, नवदेहली, शिक्षाशास्त्रिविभागः, श्रीजगन्नाथ-संस्कृतविश्वविद्यालयः, श्रीविहारः, पुरी इत्यनयोः संयुक्ततत्त्वावधाने 16 तः 20 नवम्बर, 2026 पर्यन्तम् आयोज्यमानस्य पञ्चदिवसीय- क्षमतासंवर्धन-कार्यक्रमस्य चतुर्थे दिवसे विशेषः क्रियात्मकः कार्यक्रमः सम्पन्नः।ओडिशाराज्यस्य प्रशिक्षित-स्नातक- संस्कृत- शिक्षकाणा कृते 'नवीनपाठ्यक्रमः संस्कृतपाठ्यपुस्तकानि च' इति विषयं आधारीकृत्य आयोज्यमानेऽस्मिन् कार्यक्रमे अद्य व्याकरणविभागस्य आचार्या डॉ. प्रज्ञाशर्ममहोदया 'गतिविधिः इति विषयम्' अद्भुतरूपेण पाठितवती।

॥गतिविधिभिः संस्कृतशिक्षणम्॥

डॉ. प्रज्ञामहोदयया बोधितं यत् संस्कृतं केवलं पुस्तकेन न पाठनीयम्, अपि तु क्रीडाभिः, गीतैः, अभिनयेन च पाठनीयम्। तया निम्नलिखिताः गतिविधयः प्रत्यक्षरूपेण प्रदर्शिताः, प्रतिभागिशिक्षकैः च कारिताः-

1. गीतानि- सरलसंस्कृतगीतैः उच्चारणशुद्धिः, लयबोधः च।2. क्रीडा- क्रीडामाध्यमेन भयमुक्तं शिक्षणम्।3. नामक्रीडा- नाम्ना सह परिचयः, सम्बोधनपदानां प्रयोगः।4. अङ्गक्रीडा- शरीरस्य अङ्गानां नामानि अभिनयेन बोधनम्।

5. क्रियापदक्रीडा- धातुरूपाणां, क्रियापदानां खेलमाध्यमेन अभ्यासः।6. प्रहेलिका- प्रहेलिकाभिः चिन्तनशक्तेः, शब्दसम्पत्तेः च विकासः।

7. वाक्यरचनाक्रीडा- पदानि संयोज्य वाक्यनिर्माणस्य अभ्यासः।8. चित्रं दृष्ट्वा वाक्यानि- चित्रदर्शनेन वर्णनक्षमता, वाक्यरचना च।

9. अभिनयगीतानि- गीतेन सह अभिनयेन स्मरणं स्थायि भवति।

एताभिः सर्वाभिः क्रियाभिः संस्कृतशिक्षणं रोचकं, सरलं, प्रभाविनं च भवति इति तया सप्रयोगं प्रतिपादितम्। डॉ. प्रज्ञामहोदयायाः सत्रं तस्यैव व्यावहारिकं रूपम् आसीत्। परिवेशनिर्माणम् डॉ. लक्ष्मीनारायणवेहरामहोदयः योग्यरीत्या गीतादिभिः प्रतिपादितवान्



डॉ. परमेशकुमारशर्मणः विशेषोद्बोधनम्-

श्रीलालबहादुरशास्त्रि- राष्ट्रिय- संस्कृत- विश्वविद्यालयतः समागतैः डॉ. परमेशकुमारशर्ममहोदयैः पञ्चविषयान् प्रति सर्वेषां ध्यानम् आकृष्टम्। तेनोक्तम्- विषयप्रीतिः, विभागप्रीतिः, विश्वविद्यालयप्रीतिः, स्वप्रीतिः, लक्ष्यप्रीतिः यदा एताः पञ्च प्रीतयः भविष्यन्ति, तदा एव भवन्तः स्वलक्ष्यं प्राप्स्यन्ति।

विद्वद्भिः मार्गदर्शनम्- प्रो. दत्तात्रेयमूर्तिमहोदयः सर्वान् छात्रान् सम्बोधयन् उक्तवान् यत् स्वविषयान् यथावत् सज्जीकृत्य अग्रे गन्तुं प्रयत्नः करणीयः। प्रो. पूर्णचन्द्रपाणिमहोदयः सर्वेषाम् उद्बोधनं कृतवान्। डॉ. अजयदाशमहोदयः अपि सर्वान् सम्बोधयन् प्रेरणां प्रदत्तवान्।

उपस्थिताः अधिकारिणः-

अस्मिन् अवसरे उभयसंस्थायाः अधिकारिणः, समन्वयकाः, आचार्याः च उपस्थिताः आसन्। तेषु डॉ. देवकीनन्दनः (भाषाशिक्षाविभागः, प्रो. जतीन्द्रमोहनमिश्रमहोदयः, डॉ. मनीषशर्ममहोदयः, शिक्षाशास्त्रविभागस्य प्राचार्यः डॉ. जोगेश्वरमहन्तः, डॉ. लक्ष्मीधरपण्डा (स्थानीयसमन्वयकः) डॉ परमेशकुमारशर्मा, अनिलवर्यः, डॉ दत्तहरिबेहरा, डॉ. लक्ष्मीनारायण बेहरा, ओडिशाराज्यस्य विभिन्नविद्यालयानां संस्कृतशिक्षकाः प्रमुखाः आसन्। सर्वे प्रतिभागिनः एतं क्रियात्मकं सत्रं दृष्ट्वा अतीव प्रसन्नाः, प्रेरिताः च अभवन्। एवं प्रकारेण अद्भुतः कार्यक्रमः सफलतया सम्पन्नः।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे विश्वदर्शनदिवसमुपलक्ष्य आयोजितायाः द्विदिवसीय- राष्ट्रियशोधसङ्गोष्ठ्याः सफलं समापनम्







भारतीयदर्शनस्य समकालीनप्रासङ्गिकतायाः, नैतिकमूल्यानां, तार्किकचिन्तनस्य च विषये गहनविमर्शः; दशसु शोधसत्रेषु एकोनसप्ततिः सहभागिताः अभिलिखिताः।

हिमसंस्कृतवार्ताः- जयपुरम्, १९ नवम्बरः २०२६। केन्द्रीय- संस्कृत- विश्वविद्यालयस्य जयपुरपरिसरस्य भारतीय- पाश्चात्यदर्शनशास्त्र-विद्याशाखया भारतीय- दार्शनिकानुसन्धानपरिषदः (ICPR), नवदेहल्याः सहयोगेन विश्वदर्शनदिवसस्य उपलक्ष्ये नवम्बरमासस्य अष्टादशे एकोनविंशे च दिनाङ्के द्विदिवसीया राष्ट्रियशोधसङ्गोष्ठी सफलतया आयोजिता। अस्याः सङ्गोष्ठ्याः मुख्यविषयः आसीत्- 'समकालीन-विचारकाणां दार्शनिकं योगदानम्- भारतीयदर्शनस्य नैतिक- तार्किक- मूल्यपरकपरिप्रेक्ष्ये एकम् अनुशीलनम्'।अस्याः सङ्गोष्ठ्याः प्रमुखम् उद्देश्यं समकालीन- भारतीय-पाश्चात्यविचारकाणां दार्शनिकचिन्तनस्य भारतीयदर्शनस्य समृद्धपरम्परायाः आलोकने विश्लेषणं, वर्तमानसामाजिक- शैक्षिक- नैतिक-समस्यानां समाधाने दार्शनिकसिद्धान्तानाम् उपयोगितायाः प्रतिपादनम् आसीत्।

विश्वविद्यालयस्य माननीयकुलपतेः प्रो. श्रीनिवास-वरखेडीमहोदयस्य संरक्षणे जयपुरपरिसरस्य निदेशकस्य प्रो. लोकमान्यमिश्रमहोदयस्य मार्गदर्शने च सङ्गोष्ठी आयोजिता।

उद्घाटनसत्रस्य विवरणम्

नवम्बरमासस्य अष्टादशे दिनाङ्के विश्वविद्यालयस्य संवादशालायाम् उद्घाटनसमारोहः सम्पन्नः। कार्यक्रमस्य शुभारम्भः राष्ट्रगीतस्य विश्वविद्यालय-कुलगीतस्य च सामूहिकगायनेन, वैदिकमङ्गलाचरणेन अभवत्। सङ्गोष्ठ्याः संयोजकः भारतीय-पाश्चात्यदर्शनशास्त्र- विद्याशाखायाः समन्वयकश्च डॉ. सच्चिदानन्दस्नेहीमहोदयः स्वागतभाषणं प्रास्ताविकोद्बोधनं च प्रस्तुतवान्। सः भारतीयदर्शनस्य विविधपरम्पराणां महत्त्वं प्रतिपादयन् विशेषतः न्यायदर्शनस्य प्रमाणमीमांसायाः, वैशेषिकदर्शनस्य पदार्थतत्त्व-चिन्तनस्य, वेदान्तदर्शनस्य आध्यात्मिकदृष्टेश्च विवेचनं कृतवान्। 'तत्त्वमसि', 'अहं ब्रह्मास्मि' इत्यादीनां महावाक्यानां दार्शनिकार्थान् स्पष्टयन् भारतीयज्ञानपरम्परायाः नैतिकमूल्यपरकस्वरूपं प्रकाशितवान्। तेन प्रतिपादितं यत् भारतीयदर्शनं केवलं सैद्धान्तिकचिन्तनं नास्ति, अपि तु मानवजीवनस्य व्यावहारिकसमस्यानां समाधानाय अपि समर्थम् अस्ति। उद्घाटनसमारोहस्य मुख्यातिथिः जयनारायणव्यास- विश्वविद्यालयस्य जोधपुरस्य संस्कृतविभागस्य पूर्वाचार्यः प्रो. श्रीकृष्णशर्ममहोदयः भारतीयसंस्कृतेः दार्शनिक-परम्परायाश्च विविधपक्षान् विवेचितवान्। सः धर्मार्थकाममोक्षरूपस्य पुरुषार्थचतुष्टयस्य महत्त्वं प्रतिपादयन् मानवीयजीवनस्य सन्तुलितविकासे तस्य उपयोगितां स्पष्टितवान्। पण्डित-दीनदयालोपाध्यायस्य एकात्ममानववादस्य, अन्त्योदयस्य, विकेन्द्रीकरणस्य च सिद्धान्तानाम् आधुनिकसमाजे विशेषं महत्त्वम् अस्ति इति सः अवदत्। विशिष्टातिथिः जयनारायणव्यास-विश्वविद्यालयस्य संस्कृतविभागस्य पूर्वाचार्या प्रो. सरोजकौशलमहोदया वैदिकवाङ्मयस्य दार्शनिकमहत्त्वं प्रतिपादितवती। सा पण्डित-मधुसूदन ओझामहोदयस्य ग्रन्थानां दार्शनिक-योगदानं विवेचयन्ती वेद- ब्राह्मण- आरण्यक-श्रीमद्भगवद्गीतादिषु निहितानां नैतिकाध्यात्मिक-मूल्यानां संरक्षणस्य आवश्यकतां प्रतिपादितवती।सारस्वतातिथिः जयपुरपरिसरस्य सहनिदेशकः (शैक्षणिकः) प्रो. विष्णुकान्त-पाण्डेयमहोदयः दर्शनशब्दस्य व्युत्पत्तिं विवृण्वन् भारतीयदर्शनस्य प्रमाण- तर्क- ज्ञान-मीमांसात्मकपरम्परायाः महत्त्वं निरूपितवान्। समारोहस्य अध्यक्षतां परिसरनिदेशकः प्रो. लोकमान्यमिश्रमहोदयः कृतवान्। उद्घाटनसत्रस्य सञ्चालनं नरेशसिंहमहोदयेन कृतम्।

दशशोधसत्राणां विवरणम्

द्विदिवसीयायां सङ्गोष्ठ्यां चत्वारि प्रत्यक्षसत्राणि षट् च अन्तर्जालीयसत्राणि इति आहत्य दश शोधसत्राणि आयोजितानि। प्रथमदिने पञ्च सत्राणि, द्वितीयदिने च पञ्च सत्राणि सम्पन्नानि।

प्रथमदिने षट्त्रिंशत् सहभागिताः अभिलिखिताः, यासु एकविंशतिः अन्तर्जालीयाः पञ्चदश च प्रत्यक्षाः आसन्। द्वितीयदिने त्रयस्त्रिंशत् सहभागिताः अभिलिखिताः, यासु सप्तदश अन्तर्जालीयाः षोडश च प्रत्यक्षाः आसन्। एवं द्वयोर्दिनयोः आहत्य एकोनसप्ततिः सहभागिताः अभिलिखिताः, यासु अष्टात्रिंशत् अन्तर्जालीयाः एकत्रिंशत् च प्रत्यक्षाः आसन्।

विभिन्नशोधसत्राणाम् अध्यक्षतां डॉ. महेशशर्मा, डॉ. रश्मिसोमवंशी, प्रो. सुज्ञानकुमारमाहान्ति, प्रो. अनुभववार्ष्णेय, प्रो. शुभस्मितामिश्र, प्रो. गौराङ्गबाग, प्रो. आनन्दप्रकाशत्रिपाठी, प्रो. विजेन्द्रशर्मा, डॉ. सीमा अग्रवालः, प्रो. कृष्णाशर्मा इत्यादयः विद्वांसः कृतवन्तः।सत्राणां सञ्चालनकार्ये डॉ. रश्मिसोमवंशी, डॉ. देवकरणशर्मा, डॉ. प्रीतिशर्मा, डॉ. अभिषेकजैन, डॉ. राजेश अधिकारी, अन्ये प्राध्यापकाः सहयोगं प्रदत्तवन्तः। सङ्गोष्ठ्यां स्वामिविवेकानन्दस्य व्यावहारिकवेदान्तः, महात्मगान्धिनः सत्याहिंसा-सर्वोदय- सिद्धान्ताः, डॉ. भीमराव आम्बेडकरस्य सामाजिकन्यायविचारः, स्वामिदयानन्दसरस्वत्याः वैदिकचिन्तनं, श्रीअरविन्दस्य समग्रदर्शनं, रवीन्द्रनाथ ठाकुरस्य शिक्षादर्शनं जे. कृष्णमूर्तेः स्वतन्त्रताविचारः तथा पण्डित- दीनदयालोपाध्यायस्य एकात्ममानववादः इत्यादयः विषयाः विशेषरूपेण चर्चिताः। एतदतिरिक्तं न्यायदर्शनस्य प्रमाणमीमांसा, पर्यावरणीय- नैतिकता, मानवीयगरिमा, धार्मिक-समन्वयः, महिलासशक्तीकरणम्, सामाजिक-समरसता, मूल्यपरकाशिक्षा, समकालीन-सामाजिक- समस्याः इत्यादिषु विषयेषु शोधपत्राणि प्रस्तुतानि। शोधपत्रप्रस्तुतीनां पश्चात् सत्राध्यक्षैः विद्वद्भिश्च शोधार्थिभ्यः महत्त्वपूर्णाः शैक्षणिकपरामर्शाः प्रदत्ताः। मौलिकानुसन्धानस्य, प्रमाणाधारित-विश्लेषणस्य, तुलनात्मकाध्ययनस्य च आवश्यकतायाः विषये विशेषं बलं प्रदत्तम्।

समापनसमारोहस्य विवरणम्

नवम्बरमासस्य एकोनविंशे दिनाङ्के विश्वविद्यालयस्य संवादशालायां समापनसमारोहः आयोजितः।

समारोहस्य प्रारम्भे सङ्गोष्ठ्याः संयोजकः डॉ. सच्चिदानन्दस्नेहीमहोदयः स्वागतभाषणं प्रास्ताविकोद्बोधनं च प्रस्तुतवान्। सः द्विदिवसीयायाः सङ्गोष्ठ्याः प्रमुखविषयान्, शोधपत्रप्रस्तुतीः, विदुषां योगदानं च सङ्क्षेपेण प्रतिपादितवान्। समापनसमारोहस्य मुख्यातिथिः व्याकरण-विद्याशाखायाः वरिष्ठाचार्यः प्रो. श्रीधरमिश्रमहोदयः आसीत्। विशिष्टातिथिः राजस्थान- विश्वविद्यालयस्य संस्कृतविभागस्य पूर्वाध्यक्षः प्रो. राजेन्द्रशर्मा-महोदयः, सारस्वतातिथिः जयपुरपरिसरस्य सहनिदेशकः (प्रशासनम्) प्रो. शीशराममहोदयः उपस्थितौ आस्ताम्। समारोहस्य अध्यक्षतां परिसरनिदेशकः प्रो. लोकमान्यमिश्रमहोदयः कृतवान्। समापनावसरे विद्वद्भिः भारतीयदार्शनिक-परम्परायाः संरक्षणस्य, मौलिकानुसन्धानस्य, तार्किक- चिन्तनस्य, मूल्यपरकशिक्षायाश्च संवर्धनस्य आवश्यकता विशेषतया प्रतिपादिता।

विकासकार्याणां प्रगतेः समीक्षां कृतवान् मण्डलायुक्तः वैभवः श्रीवास्तवः





निर्माणकार्येषु विलम्बः, गुणवत्तायां च अनवधानं न सह्यते; निर्धारितसमये गुणवत्तापूर्णानि कार्याणि सम्पादनीयानि

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, बस्ती, १९ नवम्बर २०२६। आयुक्तसभागारे मण्डलायुक्तस्य वैभवस्य श्रीवास्तवस्य अध्यक्षतायां मण्डलस्य विकासकार्याणाम्, एककोटिरूप्यकाधिकव्ययेन च प्रचलितानां निर्माणपरियोजनानां प्रगतिसमीक्षासभा आयोजिता।सभायां मण्डलस्य विभिन्नजनपदेषु सञ्चालितानां विकासयोजनानां निर्माणकार्याणां च प्रगतेः समीक्षा कुर्वन् मण्डलायुक्तः सम्बन्धिताधिकारिभ्यः निर्देशं दत्तवान् यत् शासनस्य प्राथमिकतायुक्तानि कार्याणि निर्धारितसमयसीमायां गुणवत्तापूर्वकं सम्पादनीयानि। सर्वैः अधिकारिभिः योजनानां कार्यान्वयने गाम्भीर्यं प्रदर्शनीयं, निर्धारितलक्ष्याणि च समये एव पूरयितव्यानि। विकासकार्येषु अनावश्यकः विलम्बः कदापि न भवेत्। यासु योजनासु प्रगतिः अपेक्षानुसारं न भवति, तासु विशेषप्रयत्नैः कार्यस्य गतिः वर्धनीया। कार्याणां प्रगतिनिरीक्षणार्थं नियमितसमीक्षा स्थलीयनिरीक्षणं च करणीयम् इति सः निर्देशितवान्।एककोटिरूप्यकाधिकव्ययेन प्रचलितानां निर्माणपरियोजनानां समीक्षावसरे मण्डलायुक्तः कार्यदायीसंस्थानां सम्बन्धितविभागानां च अधिकारिभ्यः परियोजनानां वर्तमानस्थितेः, भौतिकप्रगतेः, वित्तीयप्रगतेः, कार्यसमाप्तेः निर्धारितसमयसीमायाः च विषये विस्तृतं ज्ञानं प्राप्तवान्। सर्वाणि निर्माणकार्याणि निर्धारित-मानदण्डानुसारं सम्पादनीयानि, तेषां गुणवत्तायाः च समये समये परीक्षणं सुनिश्चितं करणीयम्। निर्माणकार्येषु प्रयुज्यमानसामग्रीणां गुणवत्तायाः तकनीकीमानदण्डानां च विशेषं ध्यानं दातव्यम् इति सः निर्देशितवान्।मण्डलायुक्तेन स्पष्टतया उक्तं यत् निर्माणकार्येषु कस्यापि प्रकारस्य अनवधानं न सह्यते। सम्बन्धिताधिकारिभिः निर्माणस्थलानां नियमितनिरीक्षणं करणीयं, कार्यसम्पादने च जायमानानां बाधानां तत्कालं समाधानं करणीयम्। येषु परियोजनासु विभिन्नविभागानां समन्वयस्य आवश्यकता वर्तते, तत्र परस्परं समन्वयं स्थापयित्वा कार्याणि शीघ्रं सम्पादनीयानि, येन परियोजनाः निर्धारितसमये पूर्णाः भवन्ति।मण्डलायुक्तः अधिकारिभ्यः निर्देशितवान् यत् जनहितसम्बद्धाः विकासयोजनाः प्राथमिकतया पूर्णाः करणीयाः। पूर्णासु परियोजनासु जनसामान्यस्य हिताय तासाम् उपयोगः सुनिश्चितः करणीयः, अपूर्णपरियोजनानां समयबद्धसमाप्तये प्रभाविणी कार्ययोजना निर्मातव्या। विकासकार्येषु पारदर्शिता, गुणवत्ता, उत्तरदायित्वं च सुनिश्चितं कर्तुं सर्वेषाम् अधिकारिणां दायित्वम् अस्ति इति सः अवदत्।सभायाः सञ्चालनं संयुक्तविकासायुक्तेन निर्मलकुमारद्विवेदिना कृतम्। सभायां बस्तीजनपदस्य जिलाधिकारी कृत्तिका ज्योत्स्ना, सन्तकबीरनगरजनपदस्य जिलाधिकारी अनुज मलिकः, सिद्धार्थनगरजनपदस्य जिलाधिकारी गौरवसिंह सोगरवालः, मुख्यविकासाधिकारी सार्थक अग्रवालः, जयकेश त्रिपाठी, बलरामसिंहः, जिलाकार्यक्रमाधिकारी राजेशकुमारः, पर्यटनाधिकारी विकासनारायणः, वरिष्ठसहायकः सुहैल अहमदः, कार्यदायीसंस्थानां प्रतिनिधयः तथा विभिन्नविभागानां मण्डलीयाः जनपदस्तरीयाश्च अधिकारिणः उपस्थिताः आसन्।

विशेषः सन्देशः

मण्डलायुक्तेन वैभव श्रीवास्तवेन स्पष्टं सन्देशं प्रदत्तं यत् विकासकार्याणि केवलम् अभिलेखेषु न सीमितानि भवेयुः, अपि तु तेषां परिणामाः धरातले अपि दृश्यन्ताम्। बस्तीमण्डले प्रचलिताः बहुमूल्यव्ययुक्ताः परियोजनाः समये गुणवत्तापूर्वकं च पूर्णाः भवन्तु, येन सामान्यजनाः तासां प्रत्यक्षं लाभं प्राप्नुयुः। अधिकारिभिः प्रतिसप्ताहं निर्माणस्थलानां निरीक्षणं करणीयं, येन निकृष्ट-गुणवत्तायुक्त- सामग्रीणां प्रयोगः कार्येषु विलम्बश्च न भवेत्। एतेषां निर्देशानां सकारात्मकः प्रभावः मार्गनिर्माणे, भवननिर्माणे तथा विविधासु विकासयोजनासु शीघ्रमेव दृश्येत इति अपेक्षा अस्ति।



कामेश्वरसिंहदरभङ्गसंस्कृतविश्वविद्यालये

अष्टमदीक्षान्तसमारोहस्य सज्जतायै समीक्षोपवेशनम्

मुख्यातिथेः, दीक्षान्तभाषणकर्तुः विविधव्यवस्थानां च विषये विमर्शः; समितिसंयोजकैः प्रस्तुताः परामर्शाः

दरभङ्गा, १९ नवम्बर २०२६।
हिमसंस्कृतवार्ता राघव नाथ झा

कामेश्वरसिंहदरभङ्गसंस्कृतविश्वविद्यालयस्य अष्टमदीक्षान्तसमारोहस्य सफलायोजनाय विश्वविद्यालयप्रशासनेन सज्जताः तीव्रतया प्रारब्धाः। पूजावकाशानन्तरं विश्वविद्यालयस्य पुनः उद्घाटनेन सह समारोहस्य आयोजनसम्बद्धाः गतिविधयः अपि वेगेन प्रवर्तिताः।अस्मिन् क्रमे गुरुवासरे कुलपतिः प्रो. लक्ष्मीनिवासपाण्डेयः विविधसमितीनां संयोजकैः विभागाध्यक्षैः च सह समीक्षोपवेशनं कृतवान्। उपवेशने प्रस्तावितस्य दीक्षान्तसमारोहस्य आयोजनसम्बद्धानां विविधविषयाणां विस्तृतः विचारः कृतः। समारोहस्य अध्यक्षता विश्वविद्यालयस्य कुलाधिपतिना लेफ्टिनेन्टजनरल (सेवानिवृत्तः) सैयद् अता हसनैने करिष्यति।उपवेशने मुख्यातिथेः, दीक्षान्तभाषणकर्तुः तथा अन्येषाम् आमन्त्रितविशिष्टातिथीनां नामानि प्रस्तावितानि। तेषां सहमतिप्राप्तेः अनन्तरमेव औपचारिकम् आमन्त्रणं प्रेषयितुं विचारः अभवत्। एतदर्थं कुलपतिः बिहारराज्यस्य उच्चशिक्षामन्त्रिणा सह सम्भावितातिथीनाम् आमन्त्रणविषये अपि विचारविमर्शं करिष्यति।

विश्वविद्यालयस्य जनसम्पर्कपदाधिकारी डॉ. निशिकान्तः अवदत् यत् परीक्षाविभागाय २०२० तः २०२५ पर्यन्तं उपाधिप्रमाणपत्रप्राप्तानां छात्राणां शोधच्छात्राणां च निश्चितसङ्ख्या प्रस्तुतुं निर्देशः प्रदत्तः। समारोहस्य आयोजनव्ययस्य प्रारम्भिकः आकलनः अपि कृतः। सर्वासां समितीनां संयोजकाः द्विदिनाभ्यन्तरे स्वस्वसमितेः व्ययविवरणं प्रस्तुतयिष्यन्ति। ततः वित्तसमितेः अनुमोदनानन्तरं कार्यकारिणीपरिषदः समक्षं प्रस्तावः उपस्थापयिष्यते।उपवेशने शोधच्छात्राणां विशिष्टातिथीनां च परिधानव्यवस्था, स्वर्णपदकानां निर्माणम्, प्रमाणपत्राणां मुद्रणम्, वितरणव्यवस्था तथा अन्येषां आवश्यकसामग्रीणां व्यवस्थापनम् इत्यादयः विषयाः अपि चर्चिताः। समारोहस्य प्रत्येकस्य पक्षस्य सुव्यवस्थितायै विभिन्नाः समितयः गठिताः सन्ति। तासु स्वागतसमितिः, मञ्चसज्जा-सम्मानसमितिः, पण्डाल-आसनव्यवस्थासमितिः, भोजन-आवासव्यवस्थासमितिः, स्वच्छता-सज्जासमितिः, पत्रकारसमितिः, स्वर्णपदकसमितिः, परिधाना-पूर्तिसमितिः, वित्तसमितिः, प्रमाणपत्रवितरण-समितिः, प्रमाणपत्रलेखनसमितिः तथा मुद्रण-प्रकाशनसमितिः प्रमुखाः सन्ति।उपवेशने सर्वासां समितीनां संयोजकैः विभागाध्यक्षैः च स्वस्वदायित्वानुसारं सुझावाः परामर्शाः च प्रस्तुताः।

सिङ्गापुरस्य वित्तीय-प्रौद्योगिकी-महोत्सवे बिहारस्य प्रौद्योगिक्याः सामर्थ्यस्य वैश्विकं प्रदर्शनम्



वैश्विकसंस्थाभिः सह निवेशस्य, कृत्रिमबुद्धेः, प्रौद्योगिकी-सहयोगस्य च सम्भावनानां विषये विचारविमर्शः

हिमसंस्कृतवार्ताः- राघवनाथझा, पटना, १९ नवम्बर २०२६

मुख्यमन्त्रिणः सम्राट् चौधरीवर्यस्य नेतृत्वे बिहारसर्वकारः राज्यं सूचनाप्रौद्योगिक्याः नवोन्मेषस्य च प्रमुखनिवेशकेन्द्रत्वेन विकसितुं निरन्तरं प्रयतते। अस्मिन्नेव क्रमे सूचनाप्राविधिकीविभागस्य सचिवस्य अभयकुमारसिंहस्य नेतृत्वे विभागीय-प्रतिनिधिमण्डलं सिङ्गापुरे आयोजिते सिङ्गापुर फ़िनटेक फ़ेस्टिवल–२०२६ इति वैश्विकवित्तीय- प्रौद्योगिकी-महोत्सवे सहभागितां कुर्वदस्ति। नवम्बरमासस्य १८ दिनाङ्कात् २० दिनाङ्कपर्यन्तं सिङ्गापुर-एक्स्पो-परिसरे आयोज्यमाने अस्मिन् महोत्सवे बिहारमण्डपस्य माध्यमेन राज्यस्य सूचनाप्रौद्योगिकी, वित्तीयप्रौद्योगिकी, कृत्रिमबुद्धिः, वैश्विकसामर्थ्यकेन्द्राणि, निवेशसम्भावनाः च वैश्विकनिवेशकानां समक्षं प्रस्तुताः।नवम्बरमासस्य १८ दिनाङ्के बिहारमण्डपस्य उद्घाटनं सिङ्गापुरस्थितेन भारतीयोच्चायुक्तेन डॉ. शिल्पक- अम्बुले- महोदयेन तथा भारतीय- व्यापारप्रवर्धन- संस्थायाः अध्यक्षेन जावेद अशरफमहोदयेन कृतम्। अस्मिन् अवसरे केन्द्रीयमन्त्री जयन्त चौधरी, सिङ्गापुरस्य राज्यमन्त्री टैन कियाट हाउ, अमरीन अमीन इत्यादयः बिहारमण्डपम् अवलोक्य राज्यस्य प्रौद्योगिकीक्षमतायाः निवेशसम्भावनानां च विषये विस्तरेण अवगतवन्तः। महोत्सवे बिहारस्य महत्त्वाकाङ्क्षिणी आर्यभट्ट-दृष्टिः इति परियोजना विशेषतया प्रदर्शिता। बिहारस्य कृत्रिमबुद्धि- अभियानस्य अन्तर्गतं वैश्विकवित्तीय- प्रौद्योगिकी-जालस्य सहयोगेन सञ्चाल्यमानायाः अस्याः परियोजनायाः माध्यमेन कृत्रिमबुद्धेः, दत्तांशाधारित-समाधानानाम्, आधुनिकप्रौद्योगिकीनां विकासाय सहयोगस्य सम्भावनाः अन्विष्यन्ते। अस्मिन् विषये संस्थायाः वरिष्ठ-पदाधिकारिभिः सहापि विचारविमर्शः अभवत्।

महोत्सवस्य प्रथमदिने हिताची, न्यूक्लियस सॉफ्टवेयर एक्सपोर्ट्स लिमिटेड, लिमिनल, रेज़रपे, सर्फ़िन, एक्सिओन तथा स्पाइस मनी इत्यादीनां संस्थानां प्रतिनिधिभिः सह निवेशस्य, वित्तीयसेवानां, प्रौद्योगिकीनवोन्मेषस्य, बिहारस्य सूचनाप्रौद्योगिकी- वैश्विकसामर्थ्य-केन्द्र- परितन्त्रस्य विकासविषये विस्तृता चर्चा अभवत्।महोत्सवस्य द्वितीयदिने, अर्थात् नवम्बरमासस्य १९ दिनाङ्के, विभागीयसचिवः अभयकुमारसिंहः मास्टरकार्ड, एमिरेट्स एनबीडी बैंक, अमेज़न वेब सर्विसेज़ तथा प्रोपेलगो इत्यादीनां प्रमुखसंस्थानां प्रतिनिधिभिः सह महत्त्वपूर्णानि उपवेशनानि कृतवान्। मास्टरकार्ड संस्थायाः वरिष्ठोपाध्यक्षेन रजतमाहेश्वरीमहोदयेन सह बिहार-राज्ये वैश्विकसामर्थ्यकेन्द्राणां स्थापनायाःसम्भावनाः,निवेशाकर्षणम् तथा प्रौद्योगिकीसहयोगः इत्येतेषां विषयाणां विषये विचारविनिमयः कृतः। एमिरेट्स एनबीडी बैंक-संस्थायाः प्रतिनिधिना फ़ुआद अलावधी महोदयेन सह नवोद्यमानां विकासः, प्रौद्योगिकीक्षेत्रे कुशल-प्रतिभानां प्रशिक्षणं, नवोन्मेषः, उद्यमितायाः संवर्धनम् इत्यादिषु विषयेषु चर्चा अभवत्। तथैव व्यवसायान्तरव्यवहारस्य, अङ्कीय-भुगतान- समाधानक्षेत्रे कार्यरतया प्रोपेलगो- संस्थया सह बिहारराज्ये व्यावसायिकगतिविधीनां विस्तारस्य, अङ्कीयभुगतानव्यवस्थायाः सुदृढीकरणस्य तथा रोजगारस्य नवीनावसराणां सृजनस्य सम्भावनाः अपि विचारिताः।

सूचनाप्राविधिकीविभागस्य मन्त्री नीतीशमिश्रः अवदत् यत् राज्ये सूचनाप्रौद्योगिकीक्षेत्रे तथा सूचना-प्रौद्योगिकीसम्बद्धसेवाक्षेत्रे (आईटीईएस) निवेशप्रोत्साहनाय बिहार- सूचनाप्रौद्योगिकी- नीतिः–२०२४, वैश्विकसामर्थ्यकेन्द्रनीतिः–२०२६ तथा बिहार-कृत्रिमबुद्धिनीति–२०२६ इत्येताः नीतयः कार्यान्विताः सन्ति। एताभिः नीतिभिः वैश्विकसंस्थानां, नवोद्यमानां तथा प्रौद्योगिकीसंस्थानां कृते अनुकूलं निवेशवातावरणं निर्मीयते। राज्यसर्वकारस्य प्रमुखं लक्ष्यं वैश्विक-निवेशम् आकर्षयितुम्, आधुनिक-प्रौद्योगिक्याः विस्तारं कर्तुम्, युवभ्यः प्रौद्योगिकीसम्बद्धकौशलस्य प्रशिक्षणं प्रदातुं रोजगारस्य उद्यमितायाश्च नवीनावसरान् सृजितुम् अस्ति। आगामिदिनेषु बिहारस्य प्रतिनिधि-मण्डलं गोयल क्लाउड, पेटीएम, एण्ट फ़ाइनेंशियल तथा लिनक्स फ़ाउण्डेशन इत्यादिभिः वैश्विक-संस्थाभिः सहापि विचारविमर्श-उपवेशनेषु भागं ग्रहीष्यति। अस्याः अन्तरराष्ट्रीयसहभागितायाः माध्यमेन बिहारस्य प्रौद्योगिकीक्षेत्रे ठोसनिवेश-प्रस्तावानां, दीर्घकालिक- संस्थागत-सहयोगस्य तथा वैश्विक- व्यापार- सम्बन्धानां विकासः अपेक्ष्यते। बिहारराज्यं वैश्विकप्रौद्योगिकी-निवेशस्य प्रमुखकेन्द्रत्वेन प्रतिष्ठा-पयितुं राज्यसर्वकारस्य एषः प्रारम्भः महत्त्वपूर्णं सोपानम् अस्ति।



कृषिमन्त्री विजयकुमारसिंहः विपणनसमित्याः परिसरस्य निरीक्षणम् अकरोत्

नवम्बरमासस्य २१ दिनाङ्के प्रधानमन्त्रिणा जनसमर्पणम्; व्यवस्थासुधाराय पदाधिकारिभ्यः आवश्यकनिर्देशाः।

हिमसंस्कृतवार्ताः- राघवनाथझा, पटना, १९ नवम्बर २०२६। बिहारसर्वकारस्य कृषिमन्त्री विजयकुमारसिंहः अद्य पटना-स्थितस्य विपणनसमित्याः परिसरस्य निरीक्षणम् अकरोत्। नवम्बरमासस्य २१ दिनाङ्के प्रधानमन्त्री नरेन्द्रमोदी अस्य परिसरस्य लोकार्पणं कृत्वा जनसामान्याय समर्पयिष्यति। निरीक्षणकाले मन्त्री परिसरस्य स्वच्छतायाः, आपणानां स्थितेः, अनुरक्षणव्यवस्थायाश्च अवलोकनं कृत्वा सम्बन्धितपदाधिकारिभ्यः आवश्यकनिर्देशान् दत्तवान्।

प्राकृतिककृष्युत्पादानां विक्रये विशेषप्रोत्साहनम्

मन्त्रिणा प्राकृतिककृषिपद्धत्या उत्पादितानां कृष्युत्पादानां विक्रयार्थं परिसरे विशेषविक्रयस्थलानि स्थापयितुं निर्देशः प्रदत्तः। तेषां स्थापनायां प्राकृतिककृष्युत्पादविक्रेतृभ्यः प्राथमिकता प्रदातव्या, येन उपभोक्तृभ्यः शुद्धगुणवत्तायुक्ताः कृष्युत्पादाः लभेरन् तथा प्राकृतिककृषेः प्रोत्साहनं भवेत्।

स्वच्छतायाः अनुरक्षणस्य च व्यवस्था

मन्त्रिणा परिसरस्य नियमितस्वच्छतायाः समुचितानुरक्षणस्य च निर्देशः प्रदत्तः। अनुरक्षणसम्बद्धाः समस्याः चतुर्विंशतिघण्टाभ्यन्तरे समाधातव्याः इति सः स्पष्टमुक्तवान्। जनसामान्यस्य सुविधायै सुरक्षायै च प्राथमिक-चिकित्सायाः समुचितव्यवस्था कर्तुमपि निर्देशितम्।

आपणानां सर्वेक्षणं समस्यासमाधानं च

अनुमण्डलपदाधिकरिणे परिसरस्थानां सर्वासाम् आपणानां सर्वेक्षणं कृत्वा वास्तविकस्थितेः विस्तृतप्रतिवेदनं समर्पयितुं निर्देशः दत्तः। आपणिकैः सह संवादं संस्थाप्य तेषां समस्याः सुझावाश्च ज्ञात्वा समाधानाय कार्याचरणं कर्तुमप्युक्तम्





हिमसंस्कृतवार्ता
डॉ. वर्षा प्रकाश टोणगांवकर
लेखिका, पुणे (महाराष्ट्रम्)

"बोधकथा"

अमेरिकायाः भूतपूर्वं टेनिसपटु आन्द्रे अगासी महोदयस्य एकः साक्षात्कारः अहं पठितवती। तत्र तेन एका कथा कथिता। जर्मन्याः बोरीस बेकर महोदयेन सह आगासी त्रिवारं पराजितः। बोरीस बेकरस्य प्रारंभस्य भेदनं केवलम् अशक्यम्। कथं तं पराजयितव्यम् इति अगासी तस्य विषये दिवारात्रौ चिन्तयन् आसीत्। बेकरमहोदयस्य क्रीड़ायाः चित्रमुद्रिका प्रतिदिनम् अनेकानेक कोणात् पश्यन् आसीत्।प्रतिदिनस्य अभ्यासस्य समये एका चित्रमुद्रिका पश्यन् वेलायां बेकर महोदयस्य एकः स्वभावः आगासी ध्यानं आगतम्। प्रत्येकं प्रारंभसमये बेकर स्वजिह्वा बहिः निष्कासयति। रञ्जकस्य भाग तु एतत् अस्ति यत्र दिशां 'जिह्वा' गच्छति तत्रैव बेकर सर्विस करोति। आगासी नैका चित्रमुद्रिकां दृष्टवान तथा सः निष्कर्षं कृतवान्। बेकरस्य 'जिह्वा' तस्य मनसि किं प्रचलति तद् दर्शयति इति। तदनन्तरं बेकरस्य सर्विस भेदनं आगासी कृते सुलभं जातम्। तदनन्तरं नवं द्वन्द्वस्पर्धा आगासी जितः।

मित्राणि स्पर्धा कियतापि कठिना, स्पर्धकः उत्तमं क्रीडालवः किन्तु यदि न भीत्वा स्पर्धां कुर्यात तर्हि जयः निश्चितः। ध्यासः, आत्मविश्वासः, अभ्यासः एतत् त्रिसूत्री आवश्यकी। एषः सन्देशः आन्द्रे आगासी महोदयस्य अभ्यासेन अस्माभिः ज्ञातः खलु?

औषधगुणसम्पन्नस्य रोजेल-पुष्पस्य कृष्या कृषकः कैलाश यादवः कृतवान् अभिनवः प्रयोगः

सस्यवैविध्यीकरणेन कृषिक्षेत्रे प्रस्तुतम् आदर्शम्



छत्तीसगढराज्यस्य पाटनविकासखण्डान्तर्गतस्य मादा-ग्रामस्य प्रगतिशीलः कृषकः कैलाश यादवः आत्मा-परियोजनायाः मार्गदर्शनेन फसलवैविध्यीकरणम् अङ्गीकृत्य कृषिक्षेत्रे अभिनवम् उपक्रमं कृतवान्। सः पारम्परिकसस्यानां सह औषधीयगुणसम्पन्नस्य रोजेल् (रक्ताम्बाडी) इति सस्यस्य कृषिम् आरब्धवान्। अनेन सः क्षेत्रस्य अन्येभ्यः कृषकेभ्यः अपि नवीनम् आदर्शं प्रस्तुतवान्।आत्मा-परियोजनायाः सञ्चालिका डॉ. इन्दिरा त्रिपाठी बुधवासरे मादा-ग्रामं प्राप्य कृषकस्य कैलाश यादवस्य रोजेल्-सस्यस्य क्षेत्रस्य निरीक्षणं कृतवती। तया उक्तं यत् रोजेल्-सस्यस्य सम्पूर्णः भागः उपयोगी विक्रययोग्यश्च अस्ति। अस्य रक्तवर्णीयानां पुष्पदलानां विपण्यां विशेषा मागः अस्ति। एतेषां पुष्पदलानां उपयोगः औषधीयचायस्य, फलमिष्टान्नस्य (जैम) तथा शरबतस्य निर्माणे क्रियते।परियोजनासञ्चालिकायाः अनुसारं रोजेल्-सस्यस्य वपनं जून-जुलाई-मासयोः क्रियते तथा पञ्चभिः मासैः एव सस्यं परिपक्वं भवति। एकस्मिन् एकरे भूमौ अस्य वपनार्थं प्रायः पञ्चदशसहस्ररूप्यकाणां व्ययः भवति।



हिमसंस्कृतवार्ताः, ईदरधीरजः

वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। सत्कारस्य कृते कृतज्ञताम् अर्पयामि तुभ्यम्। अद्य काः विचित्राः वार्ताः सन्ति?

नन्दिनी- अद्य एका विचित्रा विज्ञानवार्ता अस्ति। वैज्ञानिकैः नूतनः विद्युत्कोशः निर्मितः। सः पुनः पूरणीयः अस्ति। तस्मिन् कोशे 'बी-१२' इति जीवसत्त्वं प्रयुक्तम्। अयं कोशः विषरहितः अस्ति।

काव्या- अहो! जीवसत्त्वेन विद्युत्कोशः! एषः अद्भुतः आविष्कारः खलु। अधुना एका महाकाशवार्ता अस्ति। 'वॉयेजर-१' इति यानम् अतिदूरं गतम्। तत् पृथिव्याः एक-प्रकाशदिन-दूरे अर्थात् षड्विंशत्यब्ज-किलोमीटर-दूरे स्थितम्। ततः सङ्केतः चतुर्विंशत्या होराभिः अत्र आगच्छति। अस्माकं सङ्केतः अपि तावता कालेन तत्र गच्छति। ततः विचित्राः चुम्बक-सङ्केताः अपि प्राप्ताः।

नन्दिनी- सत्यम्! एतत् यानम् अतीव दूरं प्रस्थितम्। अद्भुतः अयं विषयः। इदानीम् एकां विचित्रां वार्तां शृणु। एकस्य पुरुषस्य शिरसि तीव्रवेदना जाता। अतः सः चिकित्सालयं गतः। पूर्वं तस्य नेत्रगोलके एकं बीजं पतितम्। तस्मात् बीजात् तत्र पादपः प्ररूढः। चिकित्सकैः सः पादपः दृष्टः। ततः तैः सः सम्यक् निष्कृष्टः।

काव्या- अहो कष्टम्! नेत्रे पादपः! इयं तु अतीव विचित्रा घटना। अधुना अन्तिमा हास्यपूर्णा वार्ता अस्ति। केषुचित् विद्यालयेषु छात्राः कक्षां न आगताः। तेषाम् अनुपस्थितिं वारयितुं विद्यालयैः नूतनः उपायः कृतः। केवलं कक्षायाम् उपस्थितये धनपुरस्कारः घोषितः। उपस्थितेभ्यः छात्रेभ्यः शत-डॉलर-परिमितं धनं दत्तम्।

नन्दिनी- हह! पठनाय धनपुरस्कारः! अस्माभिः तु बाल्यकाले एतादृशः पुरस्कारः न दृष्टः! अद्य आवाभ्याम् चतस्रः विचित्राः वार्ताः चर्चिताः। तव सहयोगस्य कृते कृतज्ञताम् अर्पयामि तुभ्यम्। पुनर्मेलिष्यामः। नमो नमः।

व्याकरणचिन्तनम्- १४

इतच्-प्रत्ययः- सोदाहरणं विवेचनम्-

इतच् = मतुप्-अर्थे भवति।

'अस्य अस्ति, अनेन युक्तः' इति अर्थे इतच् भवति।

सूत्रम्-तारकादिभ्य इतच्।

अर्थः- तारकादि-गणे पठितेभ्यः शब्देभ्यः "इतच्" भवति। इतच्-प्रत्ययस्य "इत" इत्येव शिष्यते।

प्रातिपदिकम् + इतच् = इत-युक्तः शब्दः। यथा -

तारका + इतच् = तारकितम्।

इतच्-प्रत्ययस्य अर्थविवरणम् -

युक्तः - तेन युक्तः,

सहितः - तेन सहितः,

जातः - तस्य उद्भवः जातः

लच् = ल-युक्तः भवति चेत्,

इतच् = इत-युक्तः भवति।

उभौ मतुप्-अर्थे एव।

विंशतिवाक्योदाहरणानि एवं सन्ति, अभ्यासाय -

१. तारकितम्- तारका + इतच्, तारकितं गगनं शोभते।
अर्थः- तारकाभिः युक्तम् इति।

२. पुष्पितः- पुष्प + इतच्, पुष्पितः वृक्षः वसन्तकाले राजते।
अर्थः- पुष्पैः युक्तः वृक्षः इति।

एवमेव-३ फलितः आम्रवृक्षः सर्वेषां प्रियः।

४. पल्लविता लतिका शोभते।

५. मुकुलितं कमलं प्रातः विकसति।

६. कुसुमितः उद्यानः सुगन्धं ददाति।

७. अङ्कुरितं बीजं भूमौ दृश्यते।

८. मञ्जरितः आम्रः मधुरं गन्धं वहति।

९. पण्डितः विद्वान् शास्त्रं जानाति।

१०. व्याधितः रोगी वैद्यं पश्यति।

११. शोणितं वस्त्रं रक्तेन युक्तम्।

१२. दुःखितः बालः मातरं स्मरति।

१३. सुखितः जनः धर्मं करोति।

१४. मोदितः शिष्यः गुरुम् नमति।

१५. हर्षितः बालकः क्रीडति।

१६. कण्टकितः मार्गः चलने कष्टकरः।

१७. रोमाञ्चितः भक्तः हरिं भजति।

१८. पुलकितं मनः भक्तौ लीनम्।

१९. कलङ्कितः चन्द्रः अपि शोभते।

२०. खण्डितं पात्रम् उपयोगे नास्ति। स्मरणीयम्-

तद्धितान्तः इतच्-प्रत्ययः प्रातिपदिकेन युक्तः भवति। उत्तर+इतच् = उत्तरितः/ उत्तरिता/ उत्तरितम् इति त्रिषु लिङ्गेषु विशेषणत्वेन प्रयुज्यते इति।



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः



अंशविपणिसमाचारः

भारतीयांशविपण्यां तीव्रा वृद्धिः, सेन्सेक्सः ९८९ अङ्कैः वर्धितः, निफ्टी २५,५०० अङ्कान् अतिक्रान्तवान्

मुंबई, १९ नवम्बर २०२६।
हिमसंस्कृतवार्ताः- डॉ विमलेश झा

भारतीयांशविपण्यां गुरुवासरे तीव्रा वृद्धिः दृश्यते स्म। सप्ताहस्य चतुर्थे व्यापारदिने बीएसईसेन्सेक्सः ९८९.९४ अङ्कैः (१.२१ प्रतिशतं) वर्धित्वा ८३,०२१.७५ अङ्केषु समाप्तः। अपि च एनएसईनिफ्टी-५० सूचकाङ्कः २८६.३५ अङ्कैः (१.१४ प्रतिशतं) वर्धित्वा २५,५१४.३० अङ्केषु स्थिरतां प्राप्तवान्।वैश्विकविपण्यां दुर्बलसङ्केताः विद्यमानाः आसन्, तथापि भारतीयांशविपण्यां प्रारम्भिकपतनानन्तरं महती पुनरुत्थानवृद्धिः अभवत्। प्रायः नवमासानाम् अनन्तरं निफ्टीसूचकाङ्कः २५,५०० अङ्कानाम् उपरि व्यवसायसमाप्तिं प्राप्तवान्।वाहननिर्माण-उपभोक्तृदीर्घकालो-पयोगिवस्तु-वित्तीयक्षेत्रेषु च निवेशकानां क्रयविक्रयक्रियाकलापेषु क्रयणस्य विशेषोत्साहः दृष्टः।मारुति सुजुकी, आयशर मोटर्स, महिन्द्रा एण्ड महिन्द्रा, भारतीय स्टेटबैंक तथा हिन्दुस्तान् यूनिलीवर् इत्येतेषां सम्भागेषु उल्लेखनीया वृद्धिः अभवत्। पुनश्च पेटीएम तथा मोबिक्विक इत्यादीनां यान्त्रिक भुगतानसम्बद्धानां संयन्त्राणां सम्भागेषु अवनतिः अभवत्।निफ्टी-मिडकैप१०० तथा निफ्टी-स्मॉलकैप१०० इत्यनयोः सूचकाङ्कयोः अपि वृद्धिः अभवत्। अनेन निवेशकानां सम्पत्तौ समग्ररूपेण वृद्धिः अभवत्। एवं वैश्विकविपण्याः प्रतिकूलसङ्केतानाम् उपरि अपि भारतीयशेयरविपण्यां निवेशकानां सकारात्मकभावनया क्रयणोत्साहः वर्धितः, येन प्रमुखसूचकाङ्कयोः उल्लेखनीया वृद्धिरभवत्।

कर्मचारी भविष्यनिधिसङ्गठनसदस्यानां कृते नूतनाः सुविधाः अनुमोदिताः



नवदेहली १९नबम्वर २०२६
हिमसंस्कृतवार्ताः- डॉ विमलेश झा

कर्मचारी भविष्यनिधि-सङ्गठनेन स्वसदस्यानां हिताय केचन महत्त्वपूर्णाःनिर्णयाः स्वीकृताः।अस्य अन्तर्गतं भविष्यनिधिलेखात् धनराशेः नियमितनिष्कासनाय '"नियमित धनाहरणयोजना(सिस्टेमैटिक विड्रॉल प्लान) इति नूतना योजना अनुमोदिता अस्ति। एतया योजनया सेवानिवृत्ताः सदस्याः स्वेच्छानुसारं निश्चितसमयान्तरेण भविष्यनिधेः सञ्चितां धनराशिं निष्कासयितुं शक्नुवन्ति।

ईपीएफओसङ्गठनेन पीएफलेखेषु सदस्येभ्यः निर्धारितस्य न्यूनतमशेषस्य सीमा पञ्चविंशतिप्रतिशततः न्यूनीकृत्य दशप्रतिश इति कृता अस्ति। इतः पूर्वं लेखेषु न्यूनतमं पञ्चविंशतिप्रतिशतं धनं स्थापनीयम् आसीत्, किन्तु अधुना केवलं दशप्रतिशतं धनं स्थापयित्वा शेषराशिं निष्कासयितुं शक्यते।

अपि च पूर्वं सेवां त्यक्त्वा भविष्यनिधेः सम्पूर्णधनराशिं निष्कासयितुं एकवर्षस्य प्रतीक्षाकालः निर्धारितः आसीत्। अधुना सः कालः न्यूनीकृत्य केवलं द्विमासात्मकः कृतः। अर्थात् सेवाविरामानन्तरं द्विमासे व्यतीते सदस्याः स्वस्य भविष्यनिधेः अन्तिमनिष्कासनस्य कृते आवेदनं कर्तुं शक्नुवन्ति।

तथापि निवृत्तिवेतननिधेः अन्तिमधननिष्कासनाय पूर्वनिर्धारितः षट्त्रिंशतमासानां प्रतीक्षाकाले परिवर्तनं न कृतम् अस्ति।

कर्मचारीभविष्यनिधिसंगठनन्यासीमण्डलस्य २४० तम्यां सभायां सदस्यहिताय एते निर्णयाः स्वीकृताः। केन्द्रीयश्रमजीविकोपार्जनमन्त्री श्रीमनसुखमाण्डवियामहोदयस्य अध्यक्षतायां सम्पन्नायां सभायां नूतनयोजनानां शीघ्रकार्यान्वयनस्य कृते विशेषः बलः प्रदत्तः अस्ति। एषा योजना आगामिषु द्विमासेषु प्रवर्तयितुं शक्यते इति अपेक्षा अस्ति।

अस्याः योजनायाः अन्तर्गतं सेवानिवृत्ताः सदस्याः स्वस्य सञ्चितं भविष्यनिधिधनं मासिकेन, त्रैमासिकेन अथवा षाण्मासिकेन अन्तरालेन स्वेच्छानुसारं निष्कासयितुं शक्नुवन्ति। अवशिष्टधनराशौ ईपीएफओ-सङ्गठनस्य नियमानुसारं वृद्धिराशिं प्राप्स्यते। एषा सुविधा पूर्णतया स्वैच्छिकी भविष्यति, सदस्येषु धननिष्कासनस्य कृते कापि बाध्यता न भविष्यति।प्रारम्भिकचरणे पञ्चपञ्चाशद्वर्षादधिकवयस्कानां प्रायः षट् लक्षं द्वात्रिंशत् सहस्रं (६.३२ लक्षं) ईपीएफओसदस्यानां कृते एषा नूतना व्यवस्था विशेषरूपेण लाभप्रदा भविष्यति। येषां भविष्यनिधिलेखसंख्यासु पञ्चलक्षरूप्यकाधिका धनराशिः सञ्चिता अस्ति, ते अस्याः सुविधायाः लाभं प्राप्तुं शक्नुवन्ति। यदि धनप्राप्तेः निर्धारितावधौ कस्यचित् सदस्यस्य मृत्युः भवति, तर्हि तस्य नामनिर्दिष्टः अथवा आश्रितः अवशिष्टधनराशिं निष्कासयितुं शक्नोति अथवा पूर्वनिर्धारितं नियमितधनं प्राप्नुयात्।

कर्मचारीभविष्यनिधिसंगठनन्यासीमण्डलेन वैकल्पिकनिवेशकोषे (अल्टरनेटिव इनभेस्टमेन्ट फन्ड) निवेशस्य सिद्धान्ततः अनुमोदनम् अपि प्रदत्तम्। अस्याः व्यवस्थायाः अन्तर्गतं वर्तमानस्य कुलनिवेशसीमायाः अन्तर्गतं नूतननिवेशस्य अधिकतमं त्रिप्रतिशतं वैकल्पिकनिवेशकोषे निवेशयितुं शक्यते। प्रारम्भिकचरणे अयं निवेशः सर्वकारसमर्थितसंस्थानानां माध्यमेन क्रियते। अस्य प्रमुखम् उद्देश्यम् कर्मचारीभविष्यनिधसङ्गठनस्य निवेशसूचिकामध्ये विविधतां स्वीकृत्य तथा निवेशस्य समुचितनिरीक्षणं सुनिश्चितकरणम् अस्ति।

न्यासीमण्डलेन अन्यः प्रस्तावः अपि विचारितः। तदनुसारं सदस्याः स्वनियोक्तुः वेतनप्रणाल्या पृथक् प्रत्यक्षयान्त्रिकमाध्यमेन स्वेच्छया भविष्यनिधिलेखसंख्यायां योगदानं दातुं शक्नुवन्ति।लघूपहाराः, पुरस्काराः तथा अन्ये प्रोत्साहनरूपेण प्राप्ताः धनांशाः अपि यूनिवर्सल् अकाउण्ट् नम्बर् (UAN) इत्यनेन सम्बद्धेषु भविष्यनिधिलेखसंख्यासु निक्षेप्तुं शक्यन्ते इति प्रस्तावः प्रस्तुतः अस्ति। एतेन गिगकर्मचारिणः, प्लेटफॉर्मकर्मचारिणः, गृहकर्मचारिणः तथा असङ्गठितक्षेत्रे कार्यरताः अन्ये श्रमिकाः अपि भविष्ये सेवानिवृत्तिसञ्चयस्य अवसरं प्राप्स्यन्ति।

कर्मचारिभविष्यनिधिसंगठनन्यासीमण्डलस्य मते नूतनायाः व्यवस्थायाः प्रमुखम् उद्देश्यम् अस्ति सेवानिवृत्त्यनन्तरं सदस्याणां कृते स्थिरतायै सुनिश्चितीकरणम्, पुनर्निवेशसम्बद्धसन्देहानां न्यूनीकरणम्, भविष्यनिधेः दीर्घकालिकस्थिरतायाः संरक्षणं तथा सामाजिकसुरक्षायाः विस्तारः अस्ति।

एताभिः व्यवस्थाभिः भविष्यनिधि-व्यवस्थायां अधिका अनुकूलनशीलता, पारदर्शिता तथा सदस्यहितस्य संरक्षणं भविष्यति इति अपेक्षा क्रियते।

शोहरतगढ़-विधानसभाक्षेत्रस्य एकादश युवानां कृते आजीविकायाः अवसरः,

विमानयानेन कार्यस्थलं प्रति प्रेषयितुं निर्णयः

हिमसंस्कृतवार्ताः वृजेश कुमार पाण्डेय

सिद्धार्थनगरम्। शोहरतगढ़-विधानसभाक्षेत्रस्य युवानः आजीविकाावसरेण संयोजयितुं महत्त्वपूर्णः उपक्रमः कृतः। उत्तरप्रदेश-आजीविका-मिशनस्य अन्तर्गतं जनपदीय-सेवायोजन-विभागस्य तत्त्वावधाने शोहरतगढ़स्थे शिवपति-अन्तरमहाविद्यालये विधानसभास्तरीयः आजीविकामेला आयोजितः। अस्मिन् मेलायां चयनिताः एकादश युवकयुवत्यः विभिन्नेषु उद्योगसंस्थानेषु कार्यं प्राप्तवन्तः।चयनितेषु अष्टौ अभ्यर्थिनः कर्णाटकस्य राजधानीं बेङ्गलूरुनगरं, द्वौ अभ्यर्थिनौ गुजरातस्य अहमदाबादनगरं, एकश्च अभ्यर्थी हरियाणाप्रदेशं प्रेषयितुं निर्णयः कृतः।बेङ्गलूरुनगराय चयनितेषु अभ्यर्थिषु कुसुम गोस्वामी (आइफोन), अनन्तशीलः (इण्डो एम.आई.), सन्दीप यादवः (इण्डो एम.आई.), निरङ्कार उपाध्यायः (इण्डो एम.आई.), तेजू यादवः (इण्डो एम.आई.), जयन्तसिंहः (इण्डो एम.आई.), सरिता सिंहः (आइफोन) तथा मनीषा सिंहः (आइफोन) सन्ति।अहमदाबादनगराय सिद्धान्त गुप्तः तथा शिवम सिंहः (टाटा मोटर्स) चयनितौ स्तः। अपरतः सूरज श्रीवास्तवः (फ्लिपकार्ट) हरियाणाप्रदेशाय चयनितः अस्ति।एते सर्वे अभ्यर्थिनः बेङ्गलूरु-अहमदाबाद-हरियाणा-प्रदेशेषु स्थितेषु विभिन्नेषु उद्योगसंस्थानेषु चयनिताः सन्ति।

श्रीवैष्णवसम्प्रदायस्य महान् धर्माचार्यः जगद्गुरुः श्रीराघवाचार्यः



हिमसंस्कृतवार्ताः वृजेश कुमार पाण्डेय अयोध्या।

श्रीवैष्णवसम्प्रदायस्य रामानुजाचार्यपरम्परायाः प्रमुखेषु धर्माचार्येषु जगद्गुरुः स्वामी डॉ. राघवाचार्यमहाराजः अन्यतमः अस्ति। सः अयोध्यायाः प्रसिद्धः सन्तः, धर्मगुरुः तथा च श्रीरामललासदनदेवस्थानन्यासस्य सर्वाधिकारमहन्तः अस्ति। सनातनधर्मस्य, वैदिकसंस्कृतेः तथा श्रीरामभक्तेः प्रचारप्रसारे च तस्य महत्त्वपूर्णं योगदानम् अस्ति।

जन्म तथा शिक्षा

जगद्गुरोः श्रीराघवाचार्यमहाराजस्य जन्म विक्रमसंवत् २०३३ तमे वर्षे फाल्गुनमासस्य शुक्लपक्षे पञ्चम्यां तिथौ अयोध्यायां अभवत्। बाल्यकालादेव तेन संस्कृतभाषायाः, वेदोपनिषदां, रामायणस्य तथा श्रीमद्भागवतस्य च गहनमध्ययनं कृतम्।

शैक्षणिकोपलब्धयः

वर्षे २००० तमे वाराणस्यां स्थिते सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य वेदान्तपरीक्षायां तेन प्रथमस्थानं प्राप्तम्। असाधारणप्रतिभायै सः स्वर्णपदकेन सम्मानितः अभवत्। अनन्तरं प्रोफेसरराजदेवमिश्रस्य मार्गदर्शने तेन विद्यावारिधि (पीएच.डी.) इति उपाधिः प्राप्ता।

जगद्गुरुपदेन सम्माननम्

वर्षे २०१० तमे अप्रैलमासस्य अष्टम्यां तिथौ हरिद्वारकुम्भपर्वणि विविधधर्माचार्याणां पीठाधीश्वराणां च सन्निधौ सः 'जगद्गुरु रामानुजाचार्य' इति उपाधिना सम्मानितः अभवत्।

प्रमुखाणि धार्मिकदायित्वानि

सः अयोध्यायाः रामकोटक्षेत्रे स्थितस्य श्रीधाममठस्य, श्रीराममललासदनमन्दिरस्य, हनुमन्मन्दिरस्य तथा गोंडाजनपदे स्थितस्य श्रीरामजानकीमन्दिरस्य च महन्तः पीठाधीश्वरश्च अस्ति। आञ्जनेयसेवाट्रस्टस्य प्रमुखरूपेण अपि सः धार्मिकसामाजिककार्येषु संलग्नः अस्ति।

धर्मसंस्कृतेः प्रचारप्रसारे योगदानम्

तस्य मार्गदर्शने रामानुजवेदविद्यालयः, नन्दिनीगोशाला, अन्नसेवाकार्यक्रमश्च सञ्चालिताः भवन्ति। सः सनातनधर्मस्य, वैदिकसंस्कृतेः तथा रामायणमहाभारतयोः आध्यात्मिकज्ञानस्य प्रचारप्रसाराय निरन्तरं प्रयत्नशीलः अस्ति।श्रीराममललामन्दिरस्य जीर्णोद्धारकार्ये तथा तस्य आध्यात्मिकवैदिककेन्द्ररूपेण विकासे अपि तस्य महत्त्वपूर्णं योगदानं वर्तते।धर्मसंस्कृतेः संरक्षणे, वैष्णवपरम्परायाः संवर्धने तथा समाजस्य आध्यात्मिकमार्गदर्शने जगद्गुरोः श्रीराघवाचार्यमहाराजस्य योगदानम् उल्लेखनीयम् अस्ति।

ब्रह्मर्षि-रामविलासदास-वेदान्ती-महाराजस्य प्रथमपुण्यतिथौ श्रीमद्भागवत-रसमहोत्सवस्य आयोजनम्

अयोध्यायाः हिन्दूधाम्नि २७ दिसम्बरतः ३ जनवरीपर्यन्तं भविष्यति सप्ताहव्यापिनी भागवत्कथा

हिमसंस्कृतवार्ताः वृजेश कुमार पाण्डेय अयोध्या

सर्वेभ्यः भगवद्भक्तेभ्यः सनातन-धर्मावलम्बिभ्यश्च सादरं श्रीरामजयः

श्रीरामजन्मभूम्याः आन्दोलनस्य अग्रगण्येषु नेतृत्वकर्तृषु अन्यतमस्य पूज्यपादस्य सद्गुरुदेवस्य भगवान् ब्रह्मर्षि-रामविलासदास-वेदान्ती-महाराजस्य प्रथमपुण्यतिथेः पावनावसरे श्रीमद्भागवतरसमहोत्सवस्य आयोजनं भविष्यति। अयं महोत्सवः आगामी २७ दिसम्बरतः ३ जनवरीपर्यन्तम् अयोध्यायां नयाघाटस्थितस्य पवित्रस्य हिन्दूधाम्नः प्राङ्गणे श्रद्धाभक्तिपूर्वकं समायोजयितुं निश्चितः अस्ति।अस्मिन् महोत्सवे कथाव्यासरूपेण गीतामनीषी डॉ. अशोकविश्वामित्राचार्यः, श्रीधामगोवर्धनम्, उत्तरप्रदेशतः, श्रीमद्भागवतकथामृतस्य रसास्वादनं कारयिष्यति।श्रद्धालूनां विश्वासः अस्ति यत् भाववैदुष्येन, आध्यात्मिकचिन्तनेन तथा गाढश्रद्धया समन्वितस्य आचार्यश्रीमुखनिःसृतया भागवतकथया भक्तानां कृते श्रद्धायाः, भक्तेः, मङ्गलस्य च दिव्यः सोपानः समुपस्थापितः भविष्यति।अस्मिन् पुण्यावसरे देशस्य प्रख्याताः सन्तः, विद्वांसः, महात्मानश्च समागत्य स्वदिव्यदर्शनैः आशीर्वचोभिश्च भक्तान् अनुग्रहीष्यन्ति। अतः सर्वेभ्यः सनातनधर्मप्रेमिभ्यः भगवद्भक्तेभ्यश्च विनम्रः अनुरोधः अस्ति यत् ते निर्धारितसमये अयोध्यायां समागत्य अस्मिन् पावने धार्मिकानुष्ठाने सहभागिनः भवन्तु, कथाश्रवणेन पुण्यलाभं प्राप्नुवन्तु तथा च अस्माकम् अकिञ्चनं सेवकं स्वागमनेन कृतार्थं कुर्वन्तु।

चतुरशीतिबीघाविस्तीर्णा ऐतिहासिकी भारतभारी धरोहरः उपेक्षिता, सप्तवर्षेभ्यः राजकीयमेलाघोषणायाः प्रस्तावः शासनस्तरे लम्बितः



हिमसंस्कृतवार्ताःवृजेश कुमार पाण्डेय

सिद्धार्थनगरम्। उत्तरप्रदेशस्य सिद्धार्थनगरजनपदस्य ऐतिहासिकधार्मिकपरिचयेन सम्बद्धः भारतभारीक्षेत्रः अद्यापि संरक्षणस्य विकासस्य च प्रतीक्षां कुर्वन् अस्ति। प्रायः चतुरशीतिबीघामिते विस्तीर्णे अस्मिन् प्राचीनस्थले पुरातनसभ्यतायाः अवशेषाः, प्राचीनं च टीकाक्षेत्रं सरोवरं च विद्यते। तथापि एतावन्महत्त्वपूर्णमपि स्थलम् अद्यावधि पर्यटनकेन्द्रत्वेन विकसितं नास्ति।अत्र सर्वाधिकं महत्त्वपूर्णं तथ्यम् अस्ति यत् कार्तिकपूर्णिमायाम् आयोजितस्य भारतभारीमेलस्य राजकीयमेलत्वेन घोषणायाः प्रस्तावः विगतेभ्यः सप्तवर्षेभ्यः शासनस्तरे लम्बितः अस्ति।

जनपदमुख्यालयात् प्रायः पञ्चाशत् किलोमीटरदूरे तथा डुमरियागञ्जतहसील-मुख्यालयात् अष्टकिलोमीटरदूरे स्थितस्य भारतभारीक्षेत्रस्य ऐतिहासिकतायाः पुष्टिः भारतीयपुरातत्त्वसर्वेक्षणविभागस्य १९९६-९७ तमवर्षस्य प्रतिवेदनेऽपि कृता अस्ति। काशीहिन्दूविश्वविद्यालयस्य तथा गोरखपुरविश्वविद्यालयस्य इतिहासविद्भिरपि एतत् प्राचीनम् ऐतिहासिकस्थलम् इति स्वीकृतम् अस्ति।१९०७ तमवर्षस्य गजेटियरविवरणानुसारं १८७५ तमे वर्षे आयोजिते कार्तिकपूर्णिमामेले प्रायः पञ्चाशत्सहस्रं श्रद्धालवः समागताः आसन्। स्थानीयजनश्रुत्यनुसारं महाराजदुष्यन्तस्य पुत्रस्य भरतस्य राजधानी अत्र आसीत्, अत एव अस्य स्थलस्य नाम भारतभारी इति अभवत्।पर्यटनविकासाय अनेके प्रयासाः कृताः। जिलाधिकारीमहोदयस्य अध्यक्षतायां समितिरपि गठिता, किन्तु अद्यावधि कोऽपि ठोसः परिणामः न प्राप्तः।एकतः ऐतिहासिकधरोहरायाः संरक्षणस्य तथा मेलायाः राजकीयमान्यतायाः च मागः निरन्तरं क्रियते, अपरतः अस्मिन् वर्षे मेलायाः सज्जताः अपि प्रारब्धाः सन्ति।बुधवासरे नगरपञ्चायत-भारतभारीप्रशासनेन मेलापरिसरे भूमेः सीमाङ्कनकार्यं कारितम्। अधिशासीअधिकारी श्रीराजनगुप्तस्य नेतृत्वे राजस्वविभागस्य दलं मेलायाः विविधकार्यक्रमाणां कृते उपलब्धभूमेः निरीक्षणम् अकरोत् तथा भूमेः समुचितोपयोगाय योजनाम् अपि निर्मितवती।प्रशासनस्य कथनमस्ति यत् श्रद्धालूनां मेलार्थिनां च सुविधायै सर्वाः व्यवस्थाः पूर्वमेव सुदृढाः क्रियन्ते, येन कस्मैचित् प्रकारस्य असुविधा न भवेत्।अधुना प्रमुखः प्रश्नः एषः अस्ति यत् ऐतिहासिकमहत्त्वेन समन्वितं भारतभारीस्थलम् पर्यटनकेन्द्रत्वेन कदा विकसितं भविष्यति? सप्तवर्षेभ्यः शासनस्तरे लम्बितः राजकीयमेलाघोषणायाः प्रस्तावः कदा स्वीकृतिं प्राप्स्यति?

सार्वजनिकसंवादः : पारिवारिकगोपनीयता, आध्यात्मिक-प्रतीकानां मर्यादा, राहुलगान्धिः च- डॉ. मयङ्कचतुर्वेदी



सार्वजनिके जीवने संवादस्य मर्यादा, पारिवारिकगोपनीयतायाः सीमानः, आध्यात्मिकप्रतीकानां प्रयोगे संवेदनशीलता च भारतीयसमाजे राजनीतिकविमर्शे च सदैव गम्भीरचिन्तनस्य विषयाः एव। सम्प्रति काङ्ग्रेसनेता राहुलगान्धिना स्वजनन्याः सोनियागान्धिन्याः आत्मकथायाः "बिलोंगिङ्ग : ए जर्नी ऑफ् लव्" (Belonging: A Journey of Love) इत्यस्याः विमोचनसमारोहे कथितं बाल्यकालस्य किञ्चित् निजं पारिवारिकं संस्मरणं देशस्य राजनीतिके सामाजिके सांस्कृतिके च क्षेत्रे व्यापकं विमर्शं चर्चां संवादं च उदपादयत्।

भोजनवेलायां सोनियागान्धिन्याः राजीवगान्धिनः अङ्के उपवेशनस्य अस्मिन् प्रसङ्गे बहुषु स्थलेषु समाजमाध्यमेषु केचन जनाः इदं भारतीयपारिवारिकमर्यादायाः सार्वजनिकमञ्चस्य गरिम्णश्च प्रतिकूलम् इति वदन्तः आलोचनां कृतवन्तः। अपरत्र, अस्य प्रसङ्गस्य समर्थने राहुलगान्धिना भगवतः शिवस्य मातुः पार्वत्याश्च पारम्परिकप्रतिमानाम् उदाहरणस्य प्रस्तुत्या एषा चर्चा नवीनां दार्शनिकीं धार्मिकीं च दिशं प्रापयितुं प्रयत्नः कृतः।

अतः अत्र इदानीम् आवश्यकं जातं यत् सम्पूर्णम् एतद् घटनाक्रमम्, तद्विषये जाताः विविधाः प्रतिक्रियाः, भारतीयशास्त्रेषु नीतिग्रन्थेषु च निहितानां श्लोकानां माध्यमेन प्रेमकामयोः सूक्ष्मं भेदम्, अर्धनारीश्वरस्य ब्रह्माण्डीयं स्वरूपम्, कामशास्त्रस्य मर्यादाः, आधुनिके डिजिटलयुगे निजस्य सार्वजनिकस्य च जीवनस्य सीमाः चेत्येतेषां प्रामाणिकं तथ्यात्मकं सन्तुलितं च विश्लेषणं वयं प्रस्तुवामः।

घटनाक्रमस्य पृष्ठभूमिः, तथ्यानि, सार्वजनिकप्रतिक्रियाश्च

अस्य सम्पूर्णविमर्शस्य आरम्भः सोनियागान्धिन्याः आत्मकथायाः विमोचनकार्यक्रमात् जातः। अस्मात् मञ्चात् स्वमातापित्रोः परस्परस्नेहं पारिवारिकं वातावरणं च दर्शयितुम् उद्दिश्य राहुलगान्धिना स्वबाल्यकालस्य एका स्मृतिः साझीकृता। तेन उक्तं यत् तस्य बाल्ये मध्याह्नरात्रिभोजनयोः (लञ्च-डिनरयोः) समये तस्य माता सोनियागान्धी सदैव तस्य पितुः राजीवगान्धिनः अङ्के उपविशति स्म। राहुलगान्धिनः कथनानुसारं बाल्यावस्थायाम् इदं दृश्यं तस्मै अत्यन्तं स्वाभाविकं सामान्यं च प्रतीयते स्म। तेन इदमपि उक्तं यद् यदा सः मित्राणां गृहेषु गच्छति स्म, तदा जिज्ञासया तान् पृच्छति स्म यत् तेषां मातरः पितृणाम् अङ्के कथं नोपविशन्ति। यथैव अस्य वक्तव्यस्य चलचित्रं सार्वजनिकमञ्चेषु समाजमाध्यमेषु च प्रसृतम्, तथैव तत्र तीव्राः बहुमुखाः च प्रतिक्रियाः उद्भवितुम् आरब्धाः। बहवः सामाजिकविश्लेषकाः पारम्परिकमूल्यानां समर्थकाश्च इदं कथनं भारतीयपारिवारिकमर्यादायाः सार्वजनिकमञ्चस्य गरिम्णश्च अनुरूपं नामन्यन्त। अपरतः काङ्ग्रेसदलस्य समर्थकाः आधुनिकदृष्टिधराः विचारकाश्च इदं पुत्रेण स्वमातापित्रोः मध्ये सहजस्य स्नेहस्य पारिवारिकस्य मुक्ततायाः च निर्दोषाम् अभिव्यक्तिम् अवर्णयन्। तेषां तर्कः आसीत् यत् मातापित्रोः मध्ये प्रेममयः व्यवहारः बालानां मानसिकविकासाय हितकरो भवति, न च स एकेन नकारात्मकेन दृष्टिकोणेन द्रष्टव्यः।यदा अस्मिन् निजे प्रसङ्गे आलोचनाः तीव्राः जाताः, इदं च भारतीयसंस्कृतेः प्रतिकूलं पाश्चात्यप्रभावप्रेरितं च कथ्यमानम् अभवत्, तदा राहुलगान्धिना स्वकथनस्य रक्षणार्थं भारतीयपरम्परायाः हिन्दुश्रद्धायाः प्रतीकानां च सन्दर्भः प्रदत्तः। तेन प्रेम्णः समतायाश्च महत्त्वं स्पष्टयितुं भगवतः शिवस्य मातुः पार्वत्याश्च पारम्परिकप्रतिमानाम् उदाहरणं प्रस्तुतम्, यासु माता पार्वती भगवतः शिवस्य अङ्के विराजमाना दृश्यते।वस्तुतः अस्मिन् उदाहरणेन एषः विवादः सामान्यात् राजनीतिकात् कटाक्षात् निष्कास्य गभीरस्य दार्शनिकस्य धार्मिकस्य च विमर्शस्य केन्द्रे स्थापितः। यदि भवान् वदति यत् भारतीयकलायां मूर्तिकलायां (उमामहेश्वरस्वरूपे) परम्परायां च स्त्रीपुरुषयोः मध्ये स्नेहः समता च अत्यन्तं स्वाभाविकौ पूजनीयौ च मतौ, तर्हि तत् सर्वथा सम्यक्। किन्तु सत्यमिदमपि यत् सार्वजनिकमञ्चात् कथितस्य निजस्य आख्यानस्य विषये उत्थितात् विवादात् रक्षणार्थं दिव्यानाम् अलौकिकानां च प्रतीकानाम् आश्रयणं सन्दर्भस्य मर्यादायाश्च अनुकूलं नास्ति। यतः आधुनिकस्य पारिवारिकप्रसङ्गस्य कोटिसङ्ख्यकानां जनानाम् आराध्यैः देवदेवीभिः सह तुलना आध्यात्मिकमर्यादायाः श्रद्धासंवेदनशीलतायाश्च विरुद्धा मन्यते।

सनातनदर्शने शिवपार्वत्योः अर्धनारीश्वरस्य च अलौकिकं स्वरूपम्

भारतीयाध्यात्मिकपरम्परायाः सनातनहिन्दुदर्शनस्य च सन्दर्भे पश्यामश्चेत्, महादेवः (शिवः) माता पार्वती च केवलं सांसारिकदम्पतीरूपेण न दृश्येते; तौ तु सम्पूर्णस्य चराचरजगतः मूलाधारौ। शैवशाक्तदर्शनयोः अनुसारं भगवान् शिवः 'परमचेतनायाः' (पुरुषस्य) प्रतीकम्, माता पार्वती च 'आदिशक्तेः' (प्रकृतेः) स्वरूपम्। शास्त्रेषु तौ 'व्यक्ताव्यक्तचेतनारूपेण' वर्णितौ, ययोः पारस्परिकेण संयोगेन सन्तुलनेन च एव अस्य ब्रह्माण्डस्य सृष्टिपालनसंहारप्रक्रिया निरन्तरं सञ्चाल्यते।

महाकविः कालिदासः स्वस्य प्रसिद्धे महाकाव्ये 'रघुवंशे' प्रथमश्लोके (मङ्गलाचरणे) इमं अद्वैततत्त्वम् अतीव सुन्दरतया दार्शनिकगाम्भीर्येण च व्यक्तवान् -

"वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥" (रघुवंशम् १.१) अस्य श्लोकस्य अर्थः एषः - यथा शब्दः (वाक्) तस्य अर्थश्च परस्परम् अभिन्नरूपेण संयुक्तौ, अर्थात् शब्दं विना अर्थस्य अर्थं विना शब्दस्य च कोऽपि अस्तित्वं नास्ति, तथैव सम्पूर्णस्य जगतः मातापितरौ माता पार्वती परमेश्वरः (शिवः) च परस्परं समाहितौ।

एवमेव शिवपुराणे लिङ्गपुराणे च वर्णितस्य 'अर्धनारीश्वरस्य' स्वरूपस्य कल्पना भारतीयमनीषया न कस्यचित् सामान्यस्य दाम्पत्यव्यवहारस्य सांसारिकासक्तेः वा प्रदर्शनाय कृता। एतत् इमं ब्रह्माण्डीयं सत्यं सर्वेषां समक्षं प्रकटयितुं माध्यमम् आसीत् यत् सृष्टेः सञ्चालने प्रकृतिपुरुषयोः समानम् अस्तित्वम्, उभौ च परस्परं पूरकौ।

विदुषां मतानुसारं देवदेवीनां लीलाः तेषां प्रतिमाविज्ञानं (Iconography) च मनुष्यं परमाध्यात्मिकसत्यस्य अद्वैतदर्शनस्य च बोधं कारयितुं भवन्ति। अतः अलौकिकानां ब्रह्माण्डीयचेतनायाः च एतेषां प्रतीकानां कयाचित् अपि लौकिक्या सांसारिक्या मानवीयघटनया सह तुलना दार्शनिकधार्मिकमर्यादायाः अनुकूला न मन्यते।

भारतीयशास्त्रेषु 'काम'-'भोग'-'देशकालपात्र'-मर्यादाः

अस्य चर्चाक्रमे अयं प्रश्नः स्वाभाविकतया उदेति यत् भारतीयपरम्परायां 'काम'विषये दाम्पत्यजीवनविषये च महर्षिवात्स्यायनस्य 'कामसूत्र'सदृशस्य शास्त्रीयग्रन्थस्य उपलब्धिः सत्यामपि समाजे सार्वजनिकमर्यादायाः उपरि एतावान् बलः कथं दीयते। भारतीयजीवनदर्शने चतुर्णां पुरुषार्थानां - धर्मार्थकाममोक्षाणां - व्यवस्था कृता। तत्र गृहस्थाश्रमे धर्मसङ्गतः 'कामः' जीवनस्य आवश्यकः स्वाभाविकः पवित्रश्च अङ्गः मन्यते। श्रीमद्भगवद्गीतायाः सप्तमे अध्याये स्वयं भगवता श्रीकृष्णेन धर्मानुकूलः कामः स्वस्य एव विभूतिः उक्तः -

**"बलं बलवतां चाहं कामरागविवर्जितम्।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ॥"**
(श्रीमद्भगवद्गीता ७.११)

अर्थात् - हे भरतश्रेष्ठ (अर्जुन)! अहं बलवतां कामनासक्तिरहितं बलम्, सर्वेषु प्राणिषु च धर्मानुकूलः (मर्यादितः) कामः अहमेव अस्मि। यद्यपि प्राचीनभारते कामशास्त्रस्य खजुराहो-कोणार्कसदृशानां मन्दिरशिल्पकलानां च अस्तित्वम् आसीत्, तत् अन्तर्बहिश्च जीवनदर्शनस्य बोधस्य कारणम्। तत् स्वात्मज्ञानार्थमपि अस्ति, यत् "अहं कः" इति। तथापि भारतीयपरम्परायां कस्यापि ज्ञानस्य अध्ययने चर्चायां प्रस्तुतौ च 'देशकालपात्र'स्य (स्थानस्य, समयस्य, श्रोतुः परिपक्वतायाश्च) मर्यादायाः कठोरः नियमः आसीत्। क्रमशः अग्रिमे पृष्टे...

वस्तुतः इदं सर्वे जानीमः यत् महर्षिवात्स्यायनरचितं कामसूत्रं न कश्चित् धार्मिकः पूजापाठस्य वा ग्रन्थः, अपि तु मानवीयव्यवहारस्य, कलायाः, गृहस्थाश्रमनियमानाम्, सङ्गीतस्य, चित्रकलायाः, सामाजिकशिष्टाचारस्य च प्राचीनः समाजशास्त्रीयः ग्रन्थः। यथा चिकित्साविज्ञानस्य (आयुर्वेदस्य) शरीररचनाविज्ञानस्य वा सर्वेषां विषयाणां चर्चा सार्वजनिकमञ्चेषु बालानां मध्ये वा न क्रियते, तथैव कामसूत्रादयः विषयाः अपि एकान्तस्य वयस्काध्ययनस्य वा विषयाः मताः, न तु सार्वजनिकवाचनस्य।

नीतिशास्त्रे 'योगी-रोगी-भोगी' इति शास्त्रीयं विवेचनम्

भारतीयनीतिशास्त्रे संस्कृतसुभाषितेषु च मनुष्याणां प्रवृत्तीनां रात्रिजागरणस्य इन्द्रियसुखस्य (भोगस्य) परिणामानां च अतीव सूक्ष्मं विश्लेषणं कृतम्। चाणक्यनीतौ पारम्परिकसुभाषितेषु च एकः अतिप्रसिद्धः श्लोकः प्राप्यते -"योगी रोगी तथा भोगी, त्रयः सुप्ता न रात्रिषु।
योगी योगं चिन्तयति, रोगी व्याधिं चिन्तयति, भोगी भोगं चिन्तयति॥"
अस्याः सूक्तेः मूलभावः अयम् यत् रात्रौ त्रयः प्रकाराः जनाः प्रायः जाग्रति - योगी, रोगी, भोगी च। यद्यपि एकस्मिन्नेव कालखण्डे (रात्रौ) त्रयाणां जागरणस्य बाह्या क्रिया समाना दृश्यते, तथापि त्रयाणाम् उद्देश्यानि मानसिकी स्थितिः परिणामाश्च सर्वथा भिन्नाः भवन्ति। योगी स्वात्मकल्याणाय ध्यानाय साधनाय च जागर्ति। रोगी स्वशारीरिकपीडायाः व्याधिकष्टस्य च कारणात् निद्राऽभावेन जागर्ति। भोगी तु स्वेन्द्रियतृप्तेः सांसारिकसुखस्य 'कामस्य' च वशीभूय जागर्ति।
भारतीयदर्शने 'भोगस्य' अर्थः केवलम् एकस्मिन् विषये सीमितो नास्ति; पञ्चेन्द्रियैः (शब्दस्पर्शरूपरसगन्धैः) प्राप्यमाणानि सांसारिकसुखानि भोगः इत्युच्यन्ते। कामः (इच्छा दाम्पत्यसुखं च) अस्य भोगस्य एकः महत्त्वपूर्णः भागः। किन्तु शास्त्राणि इदमपि स्पष्टयन्ति यत् अमर्यादितः भोगः अन्ततः व्यक्तिं 'रोगं' पतनं च प्रति नयति, संयमितं मर्यादितं च जीवनं तु 'योगम्' उत्थानं च प्रति। अत एव महाभारतस्य उद्योगपर्वणि महात्मा विदुरः कथयति - "अति सर्वत्र वर्जयेत्" - अर्थात् कस्मिन्नपि विषये अतेः (सीमोल्लङ्घनस्य) सर्वत्र त्यागः कर्तव्यः।

उदात्तं प्रेम कामुकता च,

सार्वजनिकवर्णनस्य संवेदनशीलता च

प्रेम अत्यन्तम् उदात्तः पवित्रः सर्वकालिकः च मानवीयः भावः, यस्य 'प्रेमत्वं' सदैव अक्षुण्णं रक्षणीयम्। स्त्रीपुरुषयोः मध्ये प्रेम भवतु, पत्युः पत्न्याश्च मध्ये आत्मीयता वा, भारतीयसमाजे तत् सदैव अन्तर्निहितस्य आन्तरिकस्य च अनुभूतेः विषयः मतः। इदं न प्रदर्शनस्य न वा सार्वजनिकव्याख्यानस्य विषयः, यतः तस्य स्वाभाविकं गौरवं सङ्कोचः गोपनीयता च विद्यते। मनुस्मृतौ भारतीयगृहस्थधर्मग्रन्थेषु च पारिवारिकसंवादस्य आचरणस्य च मर्यादायां स्पष्टानि निर्देशनानि दत्तानि। मनुस्मृतेः एकः प्रसिद्धः श्लोकः सार्वजनिकसंवादस्य मर्यादाम् अतीव यथार्थतया परिभाषते -
**"सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्।
प्रियं च नानृतं ब्रूयात् एष धर्मः सनातनः॥"**
(मनुस्मृतिः ४.१३८)



अनेन सह शास्त्रेषु इदमपि उक्तं यत् वक्तुः मुखात् निर्गतः शब्दः एकवारं सार्वजनिकः जातश्चेत् वक्तुः नियन्त्रणात् बहिर्भवति, तस्य अर्थश्च श्रोतुः दृष्ट्या मानसिकतया परिवेशेन च गृह्यते। यदा कस्यचित् निजस्य अन्तरङ्गस्य वा पारिवारिकप्रसङ्गस्य सार्वजनिकमञ्चात् वर्णनं क्रियते, तदा वक्तुः मंशा कियत्यपि निर्दोषा स्यात्, श्रोतृणां स्तरे 'उदात्तप्रेम्णः' 'लौकिककामुकतायाश्च' मध्ये सूक्ष्मं भेदं सुरक्षितं स्थापयितुम् अतीव कठिनं भवति।सार्वजनिकसभायाम् उपस्थितस्य प्रत्येकस्य जनस्य मानसिकपरिपक्वता ग्रहणदृष्टिश्च भिन्ना भवति। अत एव प्राचीनशास्त्रैः सदैव इदं सावधानं कृतं यत् गृहस्य भित्तीनाम् अभ्यन्तरस्य प्रसङ्गाः सार्वजनिकाः न क्रियेरन्। राजनीतिके सार्वजनिके च जीवने सक्रियस्य वरिष्ठनेतृवस्य कृते इयं संवेदनशीलता तु अधिकतरं महत्त्वपूर्णा भवति, यतः तेषां प्रत्येकं शब्दं समाजेन माध्यमैः राजनीतिकप्रतिद्वन्द्विभिश्च सूक्ष्मतया विश्लिष्यते। तदा अस्माभिः इदं स्वीकर्तव्यम् एव यत् राहुलगान्धिना स्वमातापितृसम्बद्धम् इमं प्रसङ्गं सार्वजनिकीकर्तुं पूर्वं तस्य सामाजिकराजनीतिकप्रभावानाम् आकलनं कर्तव्यम् आसीत्, यत् शास्त्रीये व्यावहारिके च विवेके आधारितम्।

गोपनीयतायाः सीमाः, भारतीयविधिः, पारिवारिकसंस्काराणां भूमिका च

मानवदेहस्य स्वा सीमा, समाजस्य च स्वा मर्यादा। आधुनिकः समाजः विधिश्च निजस्य सार्वजनिकस्य च आचरणस्य मध्ये स्पष्टां विभाजनरेखां कर्षतः। यथा, भारतीयविधौ - भारतीयन्यायसंहितायाः (बी.एन्.एस्.) धारायां २९६ (या पूर्वं भारतीयदण्डसंहितायाः धारा २९४ आसीत्) अन्तर्गतं कस्मिन्नपि सार्वजनिकस्थाने मुक्ते वा अश्लीलचेष्टाकरणम् अन्तरङ्गशारीरिकप्रदर्शनं वा संज्ञेयः अपराधः, यस्य कृते कारावासस्य दण्डस्य च उभयोः प्रावधानम् अस्ति। विधिः प्रत्येकं वयस्कं सम्मत्या निजस्थाने सम्बन्धस्थापनस्य स्वातन्त्र्यं गोपनीयतायाः अधिकारं च ददाति, किन्तु सार्वजनिकस्थानानां गरिम्णः अन्यनागरिकाणां संवेदनशीलतायाश्च रक्षणार्थं मुक्ते एतादृशेषु कृत्येषु कठोरः प्रतिबन्धः अस्ति। इयं विधिगता सामाजिकी च व्यवस्था एतत् तथ्यं पुष्णाति यत् सामान्यपारिवारिकस्नेहस्य अन्तरङ्गजीवनस्य च मध्ये स्पष्टा अनुल्लङ्घनीया च रेखा अनिवार्या।

परिवारस्य अन्तः मातापितरौ बालानां समक्षं मर्यादायां स्थित्वा स्वस्नेहं प्रदर्शयितुं शक्नुतः, येन बालेभ्यः सुरक्षितं सौहार्दपूर्णं प्रेममयं च वातावरणं लभ्यते, परन्तु अस्य अर्थः नैव यत् गृहस्य अन्तः स्थिताः ताः निजाः वार्ताः पारिवारिकाः अभ्यासाः आत्मीयाः क्षणाश्च वृद्धिं प्राप्य सार्वजनिकमञ्चेषु साझीक्रियन्ताम्। यदि समाजे गृहान्तःकथानां सार्वजनिकीकरणस्य प्रवृत्तिः वर्धिष्यते, तर्हि प्रत्येकस्य परिवारस्य निजाः वार्ताः सार्वजनिकचर्चायाः, लाञ्छनस्य, आरोपप्रत्यारोपस्य, परिहासस्य व्यङ्ग्यस्य च विषयाः भविष्यन्ति, येन पारिवारिकसंस्थायाः गरिम्णः क्षतिः स्वाभाविकी।
वस्तुतः अत एव परिवारस्य ज्येष्ठानां बालानां च मध्ये एतस्य स्पष्टः संवादः भवेत् यत् गृहस्य अन्तः स्थिता आत्मीयता निजानि संस्मरणानि च सम्मानस्य गोपनीयतायाश्च योग्यानि भवन्ति। प्रत्येकम् पारिवारिकम् अनुभवं बाह्यजगति सार्वजनिकमञ्चे वा साझीकर्तुं न भवति। यद्यपि इदं सत्यं यत् स्नेहः मर्यादा च उभे सह चलतः, तथापि इदमपि ध्यातव्यं यत् यथा प्रत्येकस्य जनस्य देहस्य गोपनीयतायाश्च सीमा भवति, तथैव प्रत्येकस्य परिवारस्यापि स्वं गौरवं भवति, यस्य रक्षणं परिवारस्य प्रत्येकस्य सदस्यस्य नैतिकं कर्तव्यम्।
अतः ये जनाः सार्वजनिके सामाजिके राजनीतिके वा नेतृत्वपदेषु स्थिताः, तेषां कृते वाणीसंयमः अधिकतरं महत्त्वपूर्णः भवति। सार्वजनिकमञ्चात् कथितस्य प्रत्येकस्य वचनस्य समाजे स्वस्वदृष्ट्या अर्थः निष्कास्यते, अतः निजानां कथानां साझीकरणसमये तासां सम्भाव्यप्रभावाणां ध्यानं रक्षणम् अनिवार्यम्। अपि च, अद्यतने डिजिटलसमाजमाध्यमयुगे किमपि चलचित्रं वक्तव्यं वा क्षणमात्रेण कोटिसङ्ख्यकान् जनान् प्राप्नोति, तस्मिन् च मीम्स्-व्यङ्ग्यानि निर्मीयन्ते, अतः पारिवारिके वैयक्तिके च स्तरे इयं जागरूकता आवश्यकी यत् गृहस्य कापि निजा घटना संवादः वा अविचार्य सार्वजनिकः न क्रियेत।
अतः अत्र राहुलगान्धिना साझीकृतस्य पारिवारिकप्रसङ्गस्य तदनन्तरम् उत्पन्नस्य विवादस्य च सम्पूर्णः निष्कर्षः एतत् स्पष्टीकरोति यत् सार्वजनिके जीवने संवादस्य मर्यादायां पारिवारिकगोपनीयतायां सांस्कृतिकप्रतीकानां प्रयोगे च अत्यधिका सावधानता विवेकश्च अपेक्ष्येते। यद्यपि आधुनिका दृष्टिः इदं मातापित्रोः प्रति पुत्रस्य सहजस्नेहरूपेण बालसुलभस्मृतिरूपेण च पश्यति, तथापि भारतीयसामाजिकपरम्परा नीतिशास्त्रं शास्त्रीयदर्शनं च इत्यत्र बलं ददति यत् दाम्पत्यप्रेम्णः पवित्रता तस्य 'प्रेमत्वं' च तस्य गोपनीयतायां मर्यादायाम् एव सुरक्षितं तिष्ठति।अपि च, सनातनहिन्दुधर्मे भगवतः शिवस्य मातुः पार्वत्याश्च अर्धनारीश्वरस्वरूपं ब्रह्माण्डीयचेतनायाः प्रकृतिपुरुषयोः अद्वैतस्य च सर्वोच्चं प्रतीकम्, यस्य कयाचित् अपि लौकिक्या मानवीयप्रसङ्गेन सह तुलना श्रद्धावतः समाजस्य संवेदनानाम् अनुकूला न मंस्यते। अन्ततः, स्वस्थस्य शालीनस्य मर्यादितस्य च सार्वजनिकविमर्शस्य कृते इदम् आवश्यकं यत् प्रत्येकः जनः, विशेषतः सार्वजनिकजीवनस्य प्रतिनिधयः तु कम्-से-कम, स्वपारिवारिकगोपनीयतायाः सामाजिकशिष्टाचारस्य आध्यात्मिकप्रतीकानां गरिम्णश्च मध्ये स्पष्टं सम्मानास्पदं च सन्तुलनं रक्षेयुः। एषः एव धर्मः, एतदेव च सनातनस्य सन्देशः।